This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४४८

पु.५३

-॥किरातटीकासर्ग१॥

1

Acc No.:- ~~1219~~ M1346.

Title:- ~~किरातार्जुनीय (प्रथम-द्वितीयसर्गात्मक)~~

Author:- ~~भारवि~~

subject:- poetry.

~~पत्रे~~ ! - 43

K K S U LIBRARY RAMTEK 441 106 M1346 Dist. Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंगसंख्याविभक्तिभेदेऽपि विशेषणविशेष्ययोः ॥ विभक्तिं पुनरेके वा विशेषणविशेष्ययोः ॥ समा० ॥१॥२

श्रीगणेशाय नमः ॥ अर्द्धांगीस्तदापसमस्तिगाढानुरागियत ॥ य
पितृत्वं जगतस्तस्मै कस्मै चिन्महसे नमः ॥१॥ आलंबे जगदालंबे
हेरंबचरणांबुजे ॥ शुष्यंति यद्रजःस्पर्शाद्घः प्रस्रुहवाद्रयः ॥२॥
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ॥ यत्प्रसादात्प्रलीयंते मोहां
धतमसच्छटाः ॥३॥ वाणीं काणभुजीमजीगणदवाशासीच्च वैयासी शा
कीमंतस्तंत्रमरंस्त पन्नगगवीगुंफेषु चाजागरीत् ॥ वाचामाकलयद्र पु
हस्यमखिलं यश्चाक्षपादस्फुरां लोकेऽभूद्यदुपज्ञमेव विदुषां सौ
॥१॥ जन्यजन्यं यशः ॥४॥ मल्लिनाथकविः सोऽयं मंदात्मानुजिघृक्षया ॥
या तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥५॥ नारिकेलफल
संमितं वचो भारवेः सपदि तद्विभज्यते ॥ स्वादयंतु रसगर्भनिर्भरं ॥१॥
सारमस्य रसिका यथेप्सितं ॥६॥ नानानिबंधविषमैकपदे नि
तांतसारांकचंक्रमणखिन्नधियामशंकं ॥ कर्तुं प्रकाशमिह भारवि
श्री काव्यबंधे घंटापथं कमपि नूतनमातनोमि ॥ आमातनिष्ये ॥७॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ॥ नामूलं लिख्यते किंचिन्नान
पेक्षितमुच्यते ॥८॥ अथ तत्रभवान्भारविनामा कविः काव्यं यशसेऽर्थ

कृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कांतासंमिततयोपदे
युजे इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्य कीर्त्याद्यनेकश्रेयःसाधन
तां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्य
न्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरि
समाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रियावस्तुनि
र्देशो वापि तन्मुखमिति आशीराद्यन्यतमस्य प्रबंधमुखलक्षणत्वाच्छ्रवणे
चरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति ॥ आदितः प
श्रीपशब्दप्रयोगकरणो वर्णगणादिदोषो नोधीवात्रोपयुज्यते ॥ तदुक्तं ॥ स्तो
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ॥ ते सर्वे नैव निंद्याः स्युर्लिपि
तो गणतोपि वा ॥ ॥ कुरूणां निवासाः कुरवो जनपदाः ॥ तस्य निवास इत्यण्
प्रत्ययः ॥ जनपदे लुप् ॥ तेषामधिपस्य दुर्योधनस्येनेसंबंधिनीं । शेषे शष्ठ्या
वर्ति ॥ श्रियः राज्यलक्ष्म्याः ॥ कर्तृकर्मणोः कृतीति कर्मणि षष्ठी ॥ पालयतेः
ल्युटासा पालनीं तां राज्यप्रतिष्ठापिकामित्यर्थः ॥ प्रजानुरागमूलत्वात्संपदि इ
तिभावः ॥ करणे ल्युट् ॥ टिड्ढाणञित्यादिना ङीप् ॥ प्रजासु जनेषु विषये ॥ प्रजास्या
त्संततौ जने स्यादमरः ॥ वर्णिनं व्यवहारं वेदितुं ज्ञातुं वने चरमन्वयुंक्त ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियुक्तवान्॥ वर्णीः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी वर्णवान्॥ ब्रह्मचा
रिणी निप्रत्ययः॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं॥ संकल्पोऽध्य
वसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः॥
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं॥ एतदष्टमैथुनाभावप्रशस्तिरस्त
स्य लिंगं चिन्हं यस्यास्तीति वर्णिलिंगी॥ ब्रह्मचारीवेषवानित्यर्थः॥ अ
त्रीहिभ्यो जिसच्च प्रत्ययः॥ अथ विकृतीकर्मधर्मेपि चाद्विती - दितपर
च्यतो विदितऽच्यते॥ उभयत्रापि पीतागावो भुक्ता ब्राह्मणा विभक्ता भ्रा
तर इत्यादिवत्साधुत्वं न तु कर्तरि क्तः॥ सकर्मकत्वस्य विधानाभावात्। ॥२॥
॥२॥ अत एव भाष्यकारः॥ आकरो मलथीयः॥ विभक्तमेषामस्तीति विभ
क्ताः॥ पीतमासामस्तीति पीताः॥ भुक्तमेषामस्तीति भुक्ताः॥ अथवो
त्तरपदलोपो द्रष्टव्यः॥ विभक्तधनाः पीतोदकाः पीताः अत्र लोपशब्दा
र्थमाह कैयटः॥ विभक्ता भ्रातर इत्यत्र च धनस्य विभक्तत्वं॥ तद्वत्यु
पचरितं॥ पीतोदका गाव इत्यत्रोदकस्य पीतत्वं॥ वेदितरि वनेच
रेऽपचर्यते॥ एतेन वना पीतं प्रतिबध्वचत्सां पातुं न प्रथमं व्यवस्यति
जलं पुष्पास्वपि तेष्विसेवं मदयोर्व्याख्याताः॥ अथवा विदिते विदितवान्॥

परवृत्तांतज्ञानवानित्यर्थः। सः वनेचरः ३ [illegible]पासे ४

सकर्मकादप्यविवक्षयते। कर्मणि कर्तरि क्तः॥ यथा आश्रितकर्तृत्वादे
यथाहुः॥ धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्॥ प्रसिद्धेरविवक्षातः
कर्मणोऽकर्मिका क्रियेति॥ प्रतितारादिना विज्ञापित इति वा विदितः॥
द्वैतवने द्वैताख्ये तपोवने। यद्वा द्वै इते गते यस्मात्तद्वितं तदेव द्वैतं।
तस्मिन्। शोकमोहादिवर्जित इत्यर्थः॥ प्राप्तज्ञानवैराग्य इति वा॥
युधि रणे स्थिरं युधिष्ठिरं धर्मराजं। हलदंतात्सप्तम्याः॥ संज्ञायामिति
लुक्॥ गविवुध्यां स्थिर इति षत्वं। समाययौ संप्राप्तः॥ अत्र वनेचर
इति द्वयोः स्वरव्यंजनसमुदाययोरेक~~कथन~~देवत्साव्यसनुप्रासो
नामालंकारः॥ अस्मिन्सर्गे वंशस्थवृत्तं। तल्लक्षणं॥ जतौ तु वंशस्थ
मुदीरितं जराविति वृत्तरत्नाकरे॥ १॥ तस्य तत्कालोचितमाह॥ कृ
तप्रणामेति॥ कृतप्रणामस्य तत्कालोचितवाहृतनमस्कारस्य सपत्नेन रि
पुणा दुर्योधनेन॥ रिपुवैरिसपत्नारिद्विषद्वेषणदुर्हृद इत्यमरः॥ जितां जी
त्वा यत्ती स्तां महीं महीभुजे युधिष्ठिराय॥ क्रियाग्रहणात्संप्रदानत्वं॥ निवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूषिष्यत:॥ज्ञापयिष्यत:॥लृट:सद्वेति सप्रत्यय:।तस्य वनेचरस्य मनो न विव्य
थे॥कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थ:॥व्यथ
भयसंचलनयोरिति धातोर्लिट्॥उक्तमर्थमर्थान्तरोपन्यासेन द्रढय
ति॥नहीति॥हि यस्मात्कारणात् हितमिच्छन्तीति हितैषिण:स्वामिहिता
र्थिन:पुरुषा:मृषाप्रियमनृतं प्रियं वक्तुं नेच्छन्ति॥अन्यथा कार्यवि
घातकतया स्वामिद्रोहिण:स्युरिति भाव:॥अनेन ध्यममोद्यममृषाभा
इति षित्वमभ्यूहकत्वं चेति चत्वारो गुणा निविवाव्या मते॥२॥तथापि प्रि
यार्हे राज्ञि कथं कटु निष्ठुरोक्तिरित्याशंक्य स्वाम्यनुज्ञयाने दूषयतीत्या
॥३॥ शयेनाह॥द्विषामिति॥स कृतप्रणाते वनेचरो द्विषां शत्रूणां॥कर्म ॥३॥
णि षष्ठी॥विघाताय।द्विषां विहन्तुमित्यर्थ:।तुमर्थाच्च भाववचनादि
ति चतुर्थी भाववचनाच्चेति चतुर्थ्येकवचनम्॥अत्र तादर्थ्यमपि न दो
ष:॥तथापि प्रयोगवैचित्री विशेषस्याप्यलंकारत्वादेवं व्याचक्षते॥
विधातुं व्यापारं कर्तुमिच्छत:॥समानकर्तृकेतिलृमन्॥द्विषां विहन्
तुमुद्युक्तस्यानलसस्येत्यर्थ:॥अत एवास्य स्तत:युधिष्ठिरस्य अनुज्ञामधि
गम्य।सुष्ठु भाव:सौष्ठवं शब्दसामर्थ्यं।सुष्ठुशब्दाद्व्याद्युद्गात्रादित्वा

दणप्रत्यय:।उदारस्य औदार्यमर्थसंपत्ति:द्वयोर्द्वंद्व:।सौष्ठवौदार्यं॥
औदार्यशब्दस्यापि ज्ञाध्यंतत्वेपि लक्षणहेतुत्वक्रियया इत्यत्रा
ल्पतरस्यापि कुशब्दस्य पूर्वनिपातो माभूदिति तत्रैव पूर्व
निपातस्यानियत्वं॥ज्ञापकं मानाम् पूर्वनिपात:॥उक्तं च काशिका
यां॥अयमेव लक्षणहेत्वोरिति निर्देश:पूर्वनिपातव्यभिचार
चिन्हमिति॥तत एव विशेषस्तयोर्वा विशेषस्तेन शालते शोभत इति
सौष्ठवौदार्यविशेषशालिनीं ताम्॥ताच्छील्ये णिनि:॥विनिश्चितार्था
विशेषत:प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वाचमाददे
स्वीकृतवानुवाचेत्यर्थ:॥३॥प्रथमं तावदप्रियनिवेदकमात्मा
नं प्रत्यक्षोभं याचते॥क्रियास्विति॥हे न्यप क्रियासु स्वस्य कृत्येषु यु
क्तैर्नियुक्तैरनुजीविभि:भृत्यै:शारादिभिरित्यर्थ:॥चरंतीति चरा:॥
चरै:पचाद्यजंतात्प्रज्ञादित्वादण्।तएव चक्षूंषि एषां ते चारचक्षुष:।
स्वपरमंडले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपालानामिति
नीतिवाक्यं स्मृते॥गाव:पश्यंति गंधेन वेदै:पश्यंति वाडवा:॥चारै:
पश्यंति राजानो चक्षुर्भ्यामितरे जना:॥प्रसंवो निद्ग्रहानुग्रहसम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किरातटी

अतः अप्रतार्यत्वाद्धेतोः असाधु अप्रियं वाइत्यत्र साधु मदुक्तमिति शेषः ३

र्थीः स्वामिनः । न वंचनीयाः ॥ न प्रतारणीयाः ॥ सम मेवव क्तव्या इ त्य
र्थः ॥ चारा प चारे चक्षुर प चार वद्गाज्ञां पदे पदे नि पात इ तिभावः ॥
पद्यां शब्द इ वार्थे ॥ क्षंतुं सोढुमर्हसि कुतः हितं मनोहारि प्रियं वचो प१४
दुर्लभं दुः प्रापं । अतो मद्वचो हितत्वादप्रियमपि क्षंतव्य मित्यर्थः ॥ ४ ॥
तर्हि तू ष्णीभाव एव वर मित्या शंक्याह ॥ स इति ॥ यः स खा ऽधिपं स्वा
मिनं साधु हितं न शास्ति नो पदि शति ॥ नु वि शा सिस्या दिना शा मे दुकादि
पाठात् द्विक र्मकत्वं ॥ स हि तानुपदेष्टा कुत्सितः सखा किंसखा दुर्मंत्री
त्यर्थः । किम पक्षे इ ति समासांत प्रतिषेधः । तथा यः प्रभुर्हितं न शृणोति सम र्थोऽपि अनुग्रह
॥ ४ ॥ स्वामी हितात् । आप्त वचनात् । अशुध्यातोपयोग इत्यपादानत्वात्पंचमी । ॥ ४ ॥
सजन संश्लृष्ट जो ति ॥ समागमो क्थादि सो नासं पत्तेः त्संज्ञो ति र कर्मका दात्म
ने पदं ॥ अकर्मकत्वमेव क्षितं ॥ स हितम श्रोता प्रभु त्वा किंप्रभुः ॥ कुत्सि
तः स्वामी ॥ पूर्ववत्समासः ॥ सर्वथा सचिवेन वक्तव्ये स्वामिना श्रोतव्य
चेसति मवं राज मंत्रि णो रे कमत्यं स्यादित्यर्थः ॥ ऐकमत्यस्य फलमाह सदेति ॥ तु
२ हि यस्मा न्नृपेषु स्वामिषु अमात्य सहजवा अमात्या स्तेषु च । अव्यपासप्र ।

तं । ४

अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रति मनुरागं कुर्व
ते कुर्वं ति ॥ न त्यजत्यु ज हती त्यर्थः ॥ अतो मयाव क्तव्यं त्वया श्रोतव्यमिति
भावः ॥ अत्रैवं राजमंत्रिणा हितानुपदेश तदश्रवणं निंदा सामर्थ्यात्
सिद्धा ऐकमत्य लक्षणेन कारणस्य निर्दिष्टस्य सर्वसंपद सिद्धिरूप
कार्येण समर्थनात् कार्येण कारण रूपो र्थीतरन्यासो लंकारः ॥ सा
मान्य विशेषण कार्यकारण भावाभ्यां निर्दिष्ट प्रकृत समर्थन मर्थां
तरन्यास इति ॥ ५ ॥ संप्रति स्वाहंकारं परिहरति ॥ निसर्गेति ॥ नि
सर्गदुर्बोधं स्वभावदुर्ग्रहं । इषदुरित्यादिना खल्प्रत्ययः । नृपतीना
नां चरितं कृ । अबोध विक्लवा अज्ञानोपहताः जंतवो मादृशाः पाम
र जनाइत्यर्थः । क्व जानत्य मे कत्र संघ हतइत्यर्थः । तथा च नि गूढ
तत्वं संवृत यात्यर्थं विद्विषां न यवर्त्मं पाड्गुण्य प्रयोगो मया अवेदि
ज्ञातं मितियत् । विदेः कर्मणि लङ् ॥ संधिविग्रह याना नि संस्थाप्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनमेवच ॥ द्वैधीभावश्च विज्ञेयाः षड्गुणानीति वर्णिते ॥ एतेषां ल
क्षणानि ॥ संधिर्मैत्रीकरणं ॥१॥ विग्रहः परपीडनं ॥२॥ यानं परं प्र
तिगमनं ॥३॥ संस्था परस्य देहापूर्णं ॥४॥ आसनं उपेक्षणं ॥५॥ एके
नसार्द्धं संधाय परं प्रतिगमनं द्वैधीभावः ॥६॥ अयमिदं वेदनमि
त्यर्थः ॥ विधेयप्राधान्यात्पुल्लिंगनिर्देशः ॥ तत्वानुज्ञानः तत्वैव सा
मर्थ्यं ॥ अनुगतोभावोऽनुभाव इति घञ् तेन प्रादिसमासः ॥ नतु
पसिष्टाद्घञ्प्रत्ययः ॥ श्रिणीभुवोनुपसर्ग इत्यनुपसर्गाद्भवते
॥५॥ र्धातोर्घञ् विधानात् ॥ अत एव काशिकायां ॥ कथं प्रभावो राज्ञः प्र ॥५॥
कृष्टोभाव इति प्रादिसमास इति दोषपरिहारः ॥ सम्यक् ज्ञातैव
विज्ञापयामि नतु कथाकर्णिकोऽरं प्रलपामीत्याशयः ॥६॥ सं
प्रतिपद्य क्र्यन्तदाह ॥ विशंकमानइति ॥ सुखेन युध्यते ससुयोध
नः ॥ भावं यां शासि युधिष्ठिरस्योयुग्मः कृत्यः ॥ उपासनस्थः सिं
हासनस्थोऽपि ॥ वैनेऽधिवसतीति वनाधिवासिन ॥ नोवनस्था द्रा
ऽयत्ता पादित्यर्थः ॥ न वतस्तवतः परात्तव पराजयं विशंकमानः

स्वायत्तीकृतां कथ्यादुर्नयार्जितामित्यर्थः ३

नेक्षमाणः ॥ सन् दुष्टमुदरमस्येति दुरोदरं द्यूतं ॥ पृषोदरा
दित्वात्साधुः ॥ दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः ॥ क त
स्यछद्मनाभिषेण जितां जगतीं महीं ॥ जगती विष्टपे मह्यां वास्तु
छंदविशेषयोरिति वैजयंती ॥ नसेन नीद्यां जेतुं वशीकर्तुं स
मीहते व्याप्रियते ॥ नतु दास्तइत्यर्थः ॥ न केवलं स्वामिक्रमविशुद्धा
गमं धनं ऋणं नस्य च कुतो मनस्सः समाधिस्थितिर्भावः ॥ अत्र दु
रोदरछद्मनाजितामिति विशेषणद्वारेण पदार्थस्य चतुर्थपदा
र्थं प्रतिहेतुत्वेनैवोपन्यासात् ॥ द्वितीयकाव्यलिंगमलंकारः ॥ हे
तोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति ॥७॥ न येनजेतुं जगतीं
समीहत इत्युक्तं तत्प्रकारमाह ॥ तथापीति ॥ तथापि सारांकोपि सर्जिलो
वक्रो वंचकइति यावत् ॥ सदुर्योधनोऽवक्रो शीघ्ययागुणैर्जेतुं तमाकमिल
मिच्छत्यर्थः ॥ हेतावितितृतीया ॥ गुणसंपदा ॥ दयादानदाक्षिण्यादिगु
णगरिम्णा करणेन गुर्वी यशास्तनोति ॥ सखलो गुणलोभनीयोव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संपदमात्मसात्कर्तुं वृत्तोपि गुणवत्तामात्मनः प्रगटयतीत्यर्थः॥ नन्वे
वं गुणिनः सतोपि सज्जनविरोधो माहात्म्यस्य दोषइत्याशंक्य सोपि
तं सत्संगी लाले नीचसमागमाद्दूरमुत्कर्षी न हत्यादि साह। सत्संगम
यतीति॥ तथाहि। वृत्तिं समुन्नयन्। उत्कर्षमापादयन्। लटः शतृन्ता
नचाविन्यादिना शतृप्रत्ययः॥ पुनर्लटि ग्रहणस्यानर्थ्यात् प्रथमासान
धिकरण्यपि माहात्मसि। समं सहेत्यर्थः। साकं सार्द्धं समं सहेत्यमरः॥
अनार्यसंगमादुर्जनसंगमात्। विरतम् विति पंचमी॥ विरोधोपि वरं।
॥६॥ अनार्यमनाक् प्रियं। दैवाद्धृते वरश्रेष्ठे त्रिषुक्लीबे मनाक्प्रियेऽपि ॥८॥
समरः॥ अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य वृत्तिं समुन्नये
न्निति सत्यपर्वं वाक्यान्यये समर्थवाक्यार्थस्य पुनरुपादानात्। समाप्त
पुनरादानाख्यदोषापत्तिः॥ तदुक्तं काव्यप्रकाशे। समाप्तपुनरादानात्स
माप्तपुनरात्तकमिति॥ नचवाक्यांतरमेतत्। येन दोषपरिहारः स्यात्।
अर्थांतरन्यासोलंकारः॥ सच वृत्तिं समुन्नयस्य पदार्थविशेषण

र्ग गीता

त्वात् विधानत्वं परिहृत्य वादविद्धारूपन्नु प्राणितइति॥ ८॥ ननु का
तर्षिके वक्ष्यानीति रिसारींकामनीतियुक्तं पौरुषमस्येत्याह॥ हृतेति॥
षण्णांवर्गः षड्वर्गः अरीणामंतःशत्रूणां कामक्रोधादीनां षड्वर्गस्त्रि
वर्गगत तासमासः। कामक्रोधस्तथालोभोमदोमात्सर्यमेव च॥
मोहश्चेत्यरिषड्वर्ग इति शिवतत्वागमतो यामुक्तं॥ तस्य जयः हृतो
येन तथोक्तेन विनीतेन सुर्थः। विनीताधिकारं प्रजापालनमितित्या
वः॥ अंगम्यरूपां। मनोरिमां मानविं मनूपदिष्टसमाचारक्षु
ण्णामित्यर्थः॥ पदवीं प्रजापालनपद्धतीं प्रतिपित्सुना प्रतिपत्तुमिच्छु
ना॥ प्रतिपद्यतेः सन्नैदास्तु प्रत्ययः। सनिमीमा सादिना इत्यादेशः॥
अत्रलोपोभ्यासस्य सत्यासलोपः॥ अस्ता तंद्रिरालस्यं यस्य तेनास्त
तंद्रिणा अनलसेनेत्यर्थः॥ तंद्रिः सौत्रोधातुस्माद्विनतत्माद्य
श्चेत्यादौणादिकइकारप्रत्ययः॥ हृतिकारादक्तेनोवाङीपू॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरूव्यदूतिर्नदी । घटी निद्राते द्रीतिर्जंतापि क्षीरस्वामी । तथा च रामा
यणप्रयोगः । स्वनिंतं द्विरमक्त श्च स्वदोषपरदोषवद्विति । तेन दुर्यो
धनेन पुरुषस्य कर्म पौरुषं पुरुषाकार उद्योग इति यावत् ॥ यु
वादिवादण् प्रत्ययः । पौरुषपुरुषस्यात्मेभावे कर्मणि तेजसीति
विश्वः ॥ नक्तं चेदिवा च नक्तं दीवं ॥ अहोरात्रयोरित्यर्थः ॥ अच
तुरेत्यादिना सप्तम्यर्थे द्व्योरव्ययोर्द्वंद्व निपातः समासांतः । वि
वि० ।।७।। भज्यास्यां वेलायामिदं कर्म तिष्ठागमत्सानपेन नीत्या वितन्यते वि ।।७।।
स्तार्यते ॥७॥ संप्रति तस्या दिश्यं नुरागमाह ॥ सखीनिति ॥ गतस्मयो
निरहंकारः ॥ अत एव स दुर्योधनः सततं अनारतं साधु सम्यगकपटमि
त्यर्थः ॥ अनुजीविनोऽनुसान प्रीतियुजः स्निग्धान् सखीन् मित्राणीव
दर्शयते । लोकस्येति शेषः ॥ वचत्र्यात्मनेपदं ॥ गोप्नैर्हृदयं येषां
ते सुहृदो मित्राणि । सुहृद्दुर्हृदौ मित्रामित्रयोरिति ॥ निपातः ॥ बंधु
भिः ज्ञात्यादिभिः समानं मानान्नुलपसत्कारान्न दर्शयते ॥ बंधुनां
स्वपोगवैद्युते योगेगात्रत्येगायनेपि चेति विश्वः ॥५

लमप्यस्योक्तं । यथाह । पश्यंति त्यासाज्ञानं दरीयते स्म्यान्नजौसैद
रीयते स्त्रैराज्ञा अत्रात्मनेपदं सिद्धं भवतीति । अत्राहकैय्याटः ॥
नन्वकर्मीतरसद्भावादत्रानेनात्मनेपदेन भाव्यमुच्यते । अस्मा
देवोदाहरणाद्भाष्यकारस्यापि प्रायमुच्यते । अप्यंतावस्थायां च
कर्तृकर्मणि विद्यमाने कर्मांतरसद्भावादात्मनेपदं न भ
वति यथा स्वाल मारोहयंति मनुष्याणि ॥ इहतु एवं तावस्थायां क
र्तृणां कर्मत्वमिति विज्ञायते आत्मनेपदमिति ॥१०॥ नचायं त्रिव
।।८।। र्गमप्रमाधतीयाह ॥ असक्तमिति ॥ यथायथं यथास्वं विभक्तिज्यासं ।।८।।
कीर्णं विविचेसेर्थः । यथास्वे यथायथमिति निपातनात्साधुः ॥
द्विर्भावो नपुंसकत्वं च यथास्वो नपुंसके प्रातिपदिकस्येति कस्व
त्वं । पक्षे पातः पक्षपातः आसक्तिविशेषः ॥ समस्तं त्वा पक्षपा
तोयस्यां सात यास्समपक्षपातया तया अनुरागविशेषेणमुक्तेप्र

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुहावंधुता। ग्रामजनवंधुसाहायस्य स्तात्। इतमाधिपसंयया
इताधिपसा। मिवद ॥ रीयते। बंधूनधिपती निवदरीयतीत्यर्थः॥
पथाः। इसादिषु सख्यादिवंध्रु धिअीयते लोकस्य तथा तान् संभाव
यतीत्यर्थः॥ अकुत्रिव्यादिनौकट्टिक्लिस्तं कर्मेति कर्मकत्वं। इत्येहि
स्मिन्नेव पदान्वयेवाक्यार्थमिहं वर्णयति॥ सराजाअकुत्रीव्यादी
न्स सखी निवदरीयते। सख्यादयधुवते तं औपरयंति। सख्यादि
भावेन परयतस्तांस्तथा दरीयते स्वयमेव छंदानुवृत्तितया स्वदर्श
नं तेभ्य प्रयच्छतीत्यर्थः॥ अथ तस्यापि सितकर्मकत्वं। अणिकर्तुर
णिजादि दर्शो शासने पदमुपसंख्यानमिति पाक्षिककर्मत्वं। प
वं चाख्यातकर्मणो ण्यंते कर्तुर्वेष्यारोहते हस्ती स्वयमेव स्वादिव
यमाणक्कर्मीतरसा नीनायंतोरणादिसत्र स विषयद्ति महा
पिच्च श्च शासने पदं॥ प्रतिपेदिरेनाष्पेल॥ तोरणादिसत्रविषय

नुरागोत्रकि स्त्रिसूपदेशः। ह अपश्चायं त्रिवर्गः असक्तमनासक्तमव्य
सनीयैंतुपेति यावत्। आराधयतः सेव्यमानस्यास्यदुर्योधनस्यत्र
याणाधर्मार्थकामानां गणः त्रिवर्गो धर्मकामार्थैः अपवर्गः स मोक्ष
केसमरः। गुणानुरागात्तदीयगुणेष्वनुरागाद्गुणवदाश्रयलोभा
दित्यर्थः। सख्यं मैत्री। सख्युर्यद्इति यप्रत्ययः। ईयिवानिवोपगतवा
निवोस्थुले क्ष्वा। उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययांतो निपातः॥
नाजोपसर्गस्तत्र मिति कात्रिकार आहस्म। परस्परं न बाधते स
न वर्त्तिवाद स्व धर्मार्थकामाः परस्परयानुपमर्द्दैन संवर्द्धितइत्यर्थः॥
कंच॥ धर्मार्थकामाः समभेवसेव्याः योह्येकसक्तः स जनोजघ
न्य इति॥ १९॥ अथ श्लोकत्रयेणापायकौशलं दर्शयन्नादौ साम ले
नेदर्शयति॥ निरस्यमिति॥ तस्यदुर्योधनस्य निरस्यं निर्बाधं
माईक्षेत्यर्थः। अन्यथाजनानां दुर्ग्रहत्वादित्यर्थः॥ सामाऽजेमपरं
पि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कां दानं चार्थविसर्जनं॥ भेदः परजनात्सृष्टिर्निग्रहः परपीडनं॥१॥
तमं सांबमुत्तेस भेसमरः॥ दानवर्जितं न प्रवर्तते। अन्यथा लुब्धा
यावर्जनस्य शुष्कप्रियैर्वचनैर्दुष्करत्वादित्यर्थः॥ लुब्धमर्थेन गृ
ह्णीयात्स्तब्धमंजलिकर्मणा॥ मूर्खं छंदानुवृत्त्या च तत्वार्थेन च पं
डितमिति न्यायात्॥ सूरिप्रसूतं न तु कदाचित्स्वल्पमित्यर्थः॥ दानं धन
त्यागः सदिसादरार्थे व्ययं॥ आदरानादरयोः सदसतीति निपातसंज्ञास्म
रणात्। तस्य क्रियातां सक्रियां विरहैष्य विहायस्य कापि। लघुत्ववी
दिसादेरागः न प्रवर्तते। अनादरे दानं नैष्फल्यं स्यादिति भावः॥ न
चैवं सर्वत्रैवनाप्यविनेकिलं कोशहानिः स्यादित्याह॥ अतीति॥ वि ॥८॥
शेषशालिनी अतिशयशोभिनी सत्क्रिया आदरक्रिया गुणानुरोधे
न गुणानुरागेणाविना न प्रवर्तते। पथ्य शिवनेस्यादिनात्यतीया॥
गुणिष्वेवादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः॥ अत्रोत्तर
व्य

वस्तुतोयैधनेमणावितिवेजयंती—

तर्वविशेषणतया स्थापनाद काव्यलंकारः॥ तदुक्तं काव्यप्रकाशे
प्यते योप्यते नापि यथा तर्वं परस्परं। विशेषणतया वस्तु यत्र
तावली द्विधेति च। तथा चोदाहरणं॥ न तज्जलं यन्न सुचारुपंक
पंकजं तद्यदलीनषट्पदं॥ न षट्पदोसौ कलगुंजितो न यो न कूजितं कुं ४
जहार यन्मनः॥१२॥ अथ दंडप्रकारमेवाह॥ वस्तूनीति॥
सदुर्योधनो वस्तूनि धनानि वांछन् धनलोभादित्यर्थः॥ नैहंती नि
षः॥ तथा मन्युना कोपेन च। मन्युर्दैन्ये क्रतौ अ क्रुधि इत्यमरः॥
शास्त्रानुसारेण क्रोधलोभविवर्जित इति स्मरणादित्यर्थः॥ किंतु
कारणः निवृत्तलोभादिनिमित्तः सन् स्वधर्मं इष्टेषत्वस्यरा
नो मम मायं धर्मः मम इदं कर्तव्यमित्यस्मादवहेतादित्यर्थः॥ उ
अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्॥ अयशो मह
न नरकं चाधिगच्छतीति स्मरणात्॥ इति भावः॥ गुरूपदि
ड्विवाकोपदिष्टेन। धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थि

10

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुतोयेधनेमणाविंतिवेजयंतीच

र्व विशेषणतयास्थापनादेकावल्यलंकार:।।तदुक्तं काव्यप्रकाशे
प्यते पोष्यते वापि यथापूर्वं परस्परं। विशेषणतया वस्तु यत्र
ावली द्विधेति च। तथाचोदाहरणं।।न तज्जलं यन्न सुचारु पंक
पंकजं तद्यदलीनषट्पदं।।न षट्पदोसौ कलगुंजितो न यो न कूजितं कुं ४
न्न जहार यन्मन:।।१२।।अथ दंडप्रकारमेवाह।।वस्तूनीति।।
सद्व्यैर्धनैर्वस्तूनि धनानि वा छन्नधनलोभादित्यर्थ:।।नैहंती नि ६
प:।।तथा मन्युना कोपेन च।मन्युर्दैन्ये क्रतौ अ क्रुधि इत्यमर:।।
ास्त्रानुसारेण क्रोधलोभविवर्जित इति स्मरणादित्यर्थ:।।किंच
नकारण: निवृत्तलोभादिनिमित्त:सन् स्वधर्म इत्येष स्वस्य रा
नोममायंधर्म: ममेदं कर्त्तव्यमित्यस्मादेव हेतोरित्यर्थ:।उ
अदंड्यान्दंडयन्राजादंड्यांश्चैवाप्यदंडयन्।।अयशो मह
नरकं चाधिगच्छतीति स्मरणात्।।इति भाव:।।गुरूपदि
ाड्विवाकोपदिष्टेन।धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थि

द्र:·हृतहृतामुपकारिद्रव्यं वदंति।।प्रतिदानैरेवासहृतद्रव्यं
का [redacted] रयते न तु वा कृष्मात्रेणेत्यर्थ:।।हृतद्रव्यं राजन्यनुर्जीविनो
ंसलुरत्तां श्चतंरक्षंतीतिभाव:।।१४।।अथोपायप्रयोगस्यफ
वतां दर्शयति।।अनारतमिति।।तेन राज्ञा पदेषु उपायवस्तुषु।।
दं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु इत्यमर:।।सम्यगसंकी
र्णव्यवस्तं विनियुक्तं विनियोगपदवसत्रिया अनुयोगसत्कारान्
रयावत्।।तान्नलंत्रितान् स्थानेषु सम्यक् प्रयुक्तानित्यर्थ:।।उपा
सामादय:संघर्षं परस्परस्पर्द्धामुपेत्येव सूत्प्रेक्षा।।परिवृंहि
ती:प्रचितोत्तरकालाविद्धराड्इत्यर्थ:।।अर्थसंपद:अनारतम
फलंति प्रस्तुवंति।।१५।।।।अथार्थसंपदमेवाह।।अनेकेति
पुगमच्छदस्य सप्तपर्णप्रसूनस्य गंधइव गंधो यस्यासौ अ
च्छदगंधि:।सप्तम्युपमानेत्यादिना बहुव्रीहि:।उत्तरपद [redacted]
चो।।उपमानाच्चेति समासांतइकार:।।नृपाणामुपनानि पा१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१।

।रम्भतायेदं तिनस्तेषांमदः।उपायनमुपग्राह्यमुपहारस्तथो
समरः॥राज्ञामपत्यानि पुमांसः राजन्याः क्षत्रियाः राजश्वशि
देनायप्रत्ययः॥राज्ञोपत्ये जातिग्रहणं तु॥रथाश्चाश्वाश्च
।श्वं सेनांगत्वादेकवद्भावः।अनेकेषां राजन्यानां रथाश्वे
।कुल्यं तदीयमारुह्यानं निकेतनाजिरं सभामंडपांगनं भ्रष्टरा
द्रीतांपंक्तिस्थलं नयति।एतेन माहात्म्यसम्बन्धिरत्नख्याता॥अत
उदात्तालंकारः॥तथा च सूत्रं॥समृद्धिमद्वस्तुवर्णनम्॥११॥
नद्वृति॥१८॥संप्रतिजनपदक्षेमकरत्वमाह॥सुखेनेति॥
।रायतस्मिन्दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति देवःपर्ज
एव माता एषां ते देवमातृकाः वृष्ट्यंबुजीविनो देशास्तेन
स देवमातृकाः नदीमातृका इत्यर्थः॥देशो नद्यंबुवृष्ट्यंबु
संपन्नव्रीहिपालितः॥स्यान्नदीमातृको देवमातृकश्च यथाक्र
मिसमरः॥एतेनास्य कुल्यादिस्रुतं प्रवर्तकत्वमुक्तं।कुरूणां
मास्या कृत्रिमासरिदित्यमरः॥पूर्तं खातादि कर्मणि इत्यमरः।वापीकूपतडागादि
न्यानि च।अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥६॥१

पा२

निवासाः कुरवः जनपदविशेषाः सृष्टेन पच्यंत इति सृष्टपच्याः
राजसूयेत्यादिना कर्मकर्तरि सूप्रत्ययांतो निपातः तद्विपरीता
अकृष्टपच्या इव कृषिकर्माणमस्तीति कृषीवलैः कर्षकैः
रजः इत्यादिना वलच्।सुखेनाक्लेशेन लभ्याः लभ्यं शाक्याः
सस्यसंपदो दधतो धारयंतः नाभ्यस्तस्य लिरितिन्नुमागम प्रतिषे
धः।चकासति सर्वोत्कर्षेण वर्तते इत्यर्थः॥अदभ्यस्तादिति उदादे
शः।उक्तिसादयः षड्विधस्यसर्वज्ञासंपन्नजनपदत्वादेसंतापकृन्न ने
रत्नाद्यदुःसाध्योपमितिभावः॥१७॥नन्वेवं जनं पदानुवर्ति
नस्तस्य कथमर्थलाभ इत्याह॥उदारेति॥उदारकीर्तिः माहात्म नं
शासः उदारो दातृमहतोरित्यमरः।दयावतः परदुःखप्रहरणे
च्छोः अतएव प्रशांतबाधं प्रशमित उपद्रवं यथा तथा उदयवि
शेषणं वा।दांतशांतेत्यादिना शमिधातोर्निपातः निष्ठांतो निपातः।

पर्णं२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च

अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः। संपादयतः वसूउ-
पमानस्य कुबेरोपमेयस्य॥ वसवस्तु मेरुपृष्ठस्वामिनो धनाधि-
पे च इति विश्वः। अस्य दुर्योधनस्य गुणैर्दयादानदाक्षिण्यादि-
भिः उपस्नुता द्राविता मेदिनी वसूनि धनानि स्वयं प्रदुग्धे
अक्लेशेन दुग्ध तदित्यर्थः। दुहेः कर्मणि कर्तरि लट्। न दुह-
स्नुनमां यक्चिणाविति यक्प्रतिषेधः॥ यथा केनचि-
द्वत्सेन प्रस्नुता रश्मिता गौः स्वयं प्रदुग्धे तद्वद् दुग्ध तदि-
त्यर्थः॥ अलंकारस्तु विशेषणमात्रसाम्यादप्रस्तुतस्यागम्य-
त्वे समासोक्तिरिति संक्षेपः॥१८॥ संप्रति वीरसंपदानुकू-
ल्यमाह। दर्शितपराक्रमाः वीराः। संभावितपराक्रमाः भटाः। म-
हौजस इति॥ महौजसो महाबलाः अन्यथा दुर्बलानामनुपकारि-
त्वादिति भावः॥ मानः कुलशीलाद्यभिमान एव धनं येषां ते मान-

द्वितीय १२ | १२

[illegible]नामा[illegible]र्थः

धनाः अन्यथा कदाचिद्बलदर्पाद्विकुर्वीरन्नु इति भावः॥ धनार्चि-
ताः धनैः अर्चिताः संस्कृताः अन्यथा कदाचिद्दारिद्र्यादेनं जह्युरि-
ति भावः॥ संयति संगरे लब्धकीर्तयो बहुयुद्धनिपुणा इत्यर्थः॥ अन्य-
था कदाचिद्विभ्युर्युध्येयुरिति भावः॥ संहताः मिथः स्वार्थनिष्ठा
न भवंतीति न संहताः। नञर्थस्य नशब्दस्य सुप्सुपेति समासः।
भिन्नवृत्तयो भिथो विरोधात्। स्वामिनो हानिकरा न भवंतीति
न भिन्नवृत्तयः। अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिण
स्युरित्युभयत्रापि तात्पर्यार्थः॥ धनुर्भृतो धानुष्काः आयुधमा-
त्रोपलक्षणमेतत्॥ प्राधान्याद्धनुर्ग्रहणं। तस्य दुर्योधनस्यासु-
भिः प्राणैः प्रियाणि समीहितुं कर्तुं वांछंति॥ अनन्यार्थं प्राणा-
न्दातुमिच्छंतीति॥ अन्यथा दोषस्मरणादिति भावः॥ अत्र महौज-
सादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वा-
द्रसर्थः २ तदुक्तं॥ उपकर्तुमशक्तस्य जीवनं मरणं वरमिति॥१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिधानात्॥काव्यलिंगमलंकारः।इति द्वयोस्तिलतंदुलवद्विभक्त तयास्फुरणात्संसृष्टिः॥१८॥स्वराष्ट्रवत्परराष्ट्रवृत्तांतमपि वेतीत्याह॥ महीभृतामिति॥अत्रोप्सितक्रियः समापितकर्मः आफलोदयकर्माइत्यर्थः॥सदुपायैर्घनः सच्चरितैः शुद्धचरित्रैःअन्यैश्चैरित्यर्थः॥चरंतीतिचराः तैः प्रणिधिभिः।पचाद्यच्॥महीभृतांक्रियाःप्रारंभाःनिःशेषंवेदनेन्ति॥विदोलटोवेतिणलादेशः।स्वरहस्यंनतुकश्चिदेतीत्याह॥महोदयैरिति॥ ॥१३॥

२

धातुरिवंतस्यहितंउद्योगोमहोदयैर्महावृद्धिभिः हितंउद्योगैर्महोदयैः महासमृद्धिसिद्धिहितमनुबन्धं स्वतेरित्यर्थः॥फलैः कार्यसिद्धिभिः प्रतीयतेज्ञायते।फलानुमेयास्तस्य प्रारंभाइत्यर्थः॥॥२०॥

संप्रतिमित्रवत्वमाह॥नेति॥तेनराज्ञाक्वचित्कुत्रापि स

हज्यया मौर्वी स्रज्यं मौर्वीज्या सिंञ्जिनीगुणाइत्यमरः॥तेनसहेतिकुलपयोगेनतृतीया॥धनुर्नीयतं आननं मुखं वा कोपविभिन्नंकोपकुटिलं नकृतं॥यस्यकोपएवनोदेतिकुतस्तस्य युद्धप्रसक्तिरितिभावः।कथंतर्हिज्ञाकारयतीतिराज्ञइत्यत आह॥गुणेति॥गुणेषु दयादानदाक्षिण्यादिगुणेषु अनुरागेणमाल्यपक्षे गुणेनसूत्रेणानुषंगेणेत्यर्थः॥अथवासौरस्य गुणलोभेन नराधिपैरस्यशासनमाज्ञा मालेवमाल्यं।मालामाल्यस्रोमनुस्यंकंठेगुणमधीरणमितिविश्वः॥तद्वदित्यर्थः।चालवेर्णादिलास्वार्थे ष्यञ्॥इतिक्षीरस्वामी॥शिरोभिरुह्यते धार्यते।वचिस्वपियजादीनां किति तियकिति संप्रसारणं॥अत्रोपमास्फुटैव॥२१॥

संप्रसस्यधार्मिकत्वमाह॥सइति॥इद्रशासनःअप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

14

हताज्ञ इत्यर्थः॥सदुर्योधनः नवयौवनेन उद्धतं प्रगल्भं धुरं
धरमित्यर्थः॥दुःखेन शास्यतीति दुःशासनः॥तं।भाषायां
शासियुधिदृशिधृषिमृषिभ्यो युच् इत्यादिना खल्यर्थे युच् प्रत्ययः।यौवराज्ये युव
राजकर्मणि।ब्राह्मणत्वात् ष्यञ्।निधाय नियुज्येत्यर्थः॥पुरो
धसानुमतोऽनुज्ञातस्तस्मिन्नृपात्मके सतीत्यर्थः॥तदुक्तं घने
दोषस्मरणादिति भावः॥निष्टेति हतेर्थे क्तः॥ननु गतिबु ॥१४॥
॥१४॥ द्ध्यादिना वर्तमानार्थे।अन्यथा पुरोधसेऽत्र क्तस्य च वर्त
मानेति षष्ठी स्यात्॥अखिन्नोऽनलसः मखेषु क्रतुषु हि
रण्यरेतसं अग्निं हव्येन हविषा आज्यादिहुतद्रव्येणेत्यर्थः॥
धिनोति प्रीणयति।धिवि प्रीणनार्थात् धिन्विकृण्व्योरुप्रत्य
यः।अकारश्चान्तादेशः॥२२॥सचेदेव मे तावता निरुद्योगेन
भाव्यमित्याशंक्याह स्योद्योगाशां दर्शयति॥प्रलीनेति॥सदुर्यो

धनः प्रलीनभूपालं निःसपत्नमित्यर्थः॥क्षियां शयति चिरस्थायी
त्यर्थः॥अनुनो मंडलं वारिधिभ्यः आ इत्या वारिधि आङ् मर्यादायामिति वि
भक्तिरिति व्ययीभावः॥प्रशासन्नपि आज्ञापयन्नपि।नक्षिप्तादपः ष
ड्भिस्तसंज्ञा॥नाभ्यस्तच्छतुरिति।नुमागमप्रतिषेधः॥नदिति॥
नतः एष्यंति आगमिष्यंतीति धातूनामनेकार्थत्वा दुक्तार्थसि
द्धिः।अथवा आङ् पूर्वपाठः॥एत्येधत्यूठ्स्विति वृद्धिः।लटः सद्वेति
यप्रत्ययः॥उगितश्चेति ङीप्।आच्छीनद्योरिति विकल्पान्नु
मभावः।श्रियः भयहेतून् विपद इत्यर्थः॥चिंतयन् एलेवालोकय
न्नेव।तमेवाह॥अतो बलवद्विरोधिता दुरंतादुःखावहा।सौर्व
भौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसान
मेवेत्याशयः॥सामान्येन विशेषणसमर्थनरूपोऽर्थांत
रन्यासः॥२३॥ननु गूढाकारेङ्गितस्य सपत्नस्य कथं त्वया नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सभास्थैर रथारीसग्राह ॥कथाप्रसंगेति॥कथाप्रसंगेन गो।ष्ठीव
र्त्तो न जनैरन्यत्रकथाप्रसंगेणानविषवैधेन।कथाप्र
संगोवार्त्तायां विषवैधेपिवर्त्तत इति विश्वः॥एकवच
नस्यापि कथाप्रसंगशब्दस्यजासन्निभ प्रायेणबहुवच
नसंबंधाज्जनविशेषणं॥उदाहृतात्॥उच्चारितात्।
तवाभिधानान्नामधेयात्स्मारकवाद्धेतोः॥हेतावितिपंचमी॥
आख्याह्वे ~~नामधेयंच~~ अभिधानंचे नामधेयंच नामचइत्य
॥१५॥ मरः॥अन्यत्र तवाभिधानात् नामैकदेशेनामग्रहणमिति ॥१५॥
न्यायात्।तश्चवश्चतवौतक्ष्णकवासुकीतयोः अभिधानंय
स्मिन्नतस्मात्कथाप्रसंगेष्णुजनैश्चैत्येकंपदंवा।अनुस्मृता
खंडलसुनुविक्रमः स्मृतार्जुनपराक्रमः सन्नदुःसाहादति
दुःसहात् मंत्रशब्दात्।आखंडलसुनुरिंद्रानुजः उपेंद्रः वि

ष्णुरितियावत्॥सूनुः पुत्रेनुजेरनाविति विश्वः॥तस्य विः प
क्षी गरुड इत्यर्थः॥तस्य पराक्रमः पादविक्षेपः सोनुस्मृतो ये
न स तथोक्तः॥स्मृतगरुडमहिमा उरगइवातएवनतानन:
सन्नव्यथते।दुःखायते।पीडाबाधाव्यथादुःखमित्यमरः॥
अस्कुटत्वपदोषादिविकारादुर्वीराइतिभावः॥सर्वत्रजय
मत्रिधे हुआदिधे पराजयमिति॥न्यायादर्जुनोत्कर्षकथनं
युधिष्ठिरस्याकर्षणमेवेति सर्वत्रमवदातं॥२४॥संप्रति
वाक्य निगमयति॥सौख्यस्य उपसंहारो निगमनं।तदिति॥तत्त प्लोऽद्भुपदर्शी
४ त्वा लयिधिष्ठिरं कपटं कर्तुंउद्यतेषां जिघांसा विस्पर्धेः।तत्र
तस्मिन्नदुर्योधने विधेयं कर्त्तव्यं उत्तरं प्रतिक्रिया अश्रुवि
क्रियतां धीयतां॥ननुकर्त्तव्यमपि न ये वोच्यतामित्याशंक्याह॥प
रति॥परप्रणीतानि वचांसि चिन्वता संदृष्टतां मादृशां

५०

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वार्त्ताहारिणामित्यर्थः॥ गिरः प्रवृत्तिसाराः वार्त्तामात्रसाराः ख
लु। वार्त्ताप्रवृत्तिर्वृत्तांत उदंतः स्यादथाकृपयी इत्यमरः॥ वा
र्त्तामात्रवादिनो वयं न तु कर्त्तव्यार्थोपदेशसमर्था इत्यर्थः।
कार्यं क्रियतां अतस्त्वयैव निर्धार्य॥ क्रियानिमित्तविशेषणसमर्थनादर्थां
तरन्यासः॥२५॥ इतीति॥ वनसंनिवासिनां पत्यौ वनेचरा
णामधिपे इति गिरमीरइत्वैकातमात्तसत्क्रिये ऽटहीतपा
रितोषके गते सति। कृष्टिदोनमे वनवनेचराणां वेतनं ते
॥१६॥ नितल्लोभात्स्वामिकार्ये प्रवृत्तिरस्यतीति भावः॥ अथ मही ॥१६॥
भुजा राज्ञा हृष्णा सदनं प्रविश्यानुजसंनिधौ तद्वनेचरो
क्तं वचः आचक्षे॥ आख्यातं। अथवा हृस्तेति पदच्छेदः। स
दनं प्रविश्यानुजसंनिधौ तद्वचः हृष्णा आचचक्षे आख्या
ताचक्षुङो दुहादि द्विकर्मकत्वादप्रधाने कर्मणि लिट्॥२६॥
निशांम्येति॥ ॥अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं च

द्धिरसूसां निशांम्यते योद्विषर्ध्यो आगताः त तस्याः अव्यपास
विति मप्रत्ययः। अपा हृती निरिशंकाशान्नू विनियंतुं वि
सोढुं अक्षमासती नृपस्य युधिष्ठिरस्य मन्युव्यक्त साधयोः
कोधोद्योगयोः। दीपिनीः संवर्द्धिनीः गिरो वाक्यानि उदाज
हार। जगादेत्यर्थः॥२७॥ अथामानः समयं याचेयंतीस
तीत्याह॥ भवादृशेष्विति। भवादृशाः भवद्विधाः पंडिता इत्यर्थः। १
। तेषु विषयेषु॥ त्यादिना दृदिखित्यादिना कञ्‌प्रत्ययः सर्वनाम्न
इत्याकारादेशः॥ प्रमदाजनोक्तं स्त्रीजनोक्तं। वेदेतः वच स्वपिया
दिनासंप्रसारणं॥ अनुशासनं नियोगवचनं अधिक्षेप इति
रस्कार इव भवति। अतोवकुं न युक्तमित्यर्थः। तथापि निर
स्तनारीसमयाः त्याजितशालीनतास्त्वपत्नीसमाचाराः। स
मयाः शपथाचारकालसिद्धांतसंविद इत्यमरः॥ दुराधयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु
दुष्टमनोरथा: ॥ पुंस्याधिर्मीनसीव्यये सुमर: । मां वर्तुं व्यवसा
ययंति प्रेरयंति ॥ न किंचिदप्युक्तं दुखितानामिति भाव: २८॥
उपखंडलमिति । आखंडलतुल्यधामन्निरिंद्रसमानप्रतापे:
स्वनं राज्ञे : नृपतिभि: भरतादिभिश्चिरमखंडमविच्छिन्नं प्य
ता महीलयामदध्योतति इति मदश्च्युन्मदस्राविणा मतंग
जेन स्रगिणात्म अहस्तेन स्वकरेणच पलेने स्पर्धः । अपव
ह्र० र्जिता परि[illegible]ता । स्वदोषादेवाप मनर्थीगमद्दस्पर्श: ॥ २९॥
॥१७॥ स्वदोषादेवापमनर्थागमइत्युक्तं सचदोष: कुटिलेष्वृज ॥१७॥
कौटिल्यमिह ॥ व्रजंतीति ॥ मृदधिय: निर्विवेकानुद्रुप:तेप
राभ्नं व्रजंति । येमायाविष्णुमायावस्तुविषये । अस्मायेसा
दिनाविति प्रसय: । माया विन: मायावंत: । व्रिहांदिहादलि
प्रसय: । नभवंति ॥ अत्रैवार्थांतरन्यासेन समर्थयति ॥
प्रविश्येति ॥ राठा अपकारिण: धूर्ता: तथाविधानकु
वेषा

प्रविश्य हि२
टिलान संवृत्तांगानवर्मितशरीरान् निशिताः स्तीक्ष्णा इषव इव प्रने रांस्त्वा घ्नंति ॥ आर्जवं कुटिलेषु न नीति रिति
भाव: ॥ ३० ॥ न चलक्ष्मीचांचल्यादयमनर्थागम: किंतु
स्वोपेक्षादिदोषमूलत्वादिसारायेनाह ॥ गुणेति ॥ अनु
रक्तसाधन: अनुरक्तसाहायवान् । उक्तंच कामंदके । उद्योगा
दनिवृत्तस्य सुसाहायस्य धीमत: ॥ छायेवानुगतास्य तस्य निसं
श्री: सहचारिणी ॥ कुलाभिमानी क्षत्रियं कुलमलादभिमानी
कुलीनत्वादभिमानी चलदन्यस्ता: त्वत्तोन्य: अन्यादितलापंचमी ।
ऋइव द्वि० कोनराधिप: गुणे: संध्यादिभि: सोंदर्पादिभिश्च संधिविग्रहया
नासनसंश्रयद्वैधीभावा: षड्गुणा: । पणबंध: संधि: । अपका
रो विग्रह: । यानं शिबिकादि । रणस्यादुच्चपर्वताद्यारोहण
मासनं ॥ विग्रहभितासमर्थाश्रयणं संश्रय: । एकेन सहसं
धायापरेणं सह विग्रहकरणं द्वैधीभाव: ॥ इति षड्गुणा: ॥ अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथदशाभिः श्लोकैः कोपोद्दीपनं करोति ५

रक्तां कुलजां कुलक्रमादागतां कुलीनां च । मनोरमां श्रीयं आत्म
न ध्रुवं स्वभावी भिनवं व धूर्जीपास्तुषापि चेत्समरः ॥ परैः शत्रु
भिरपकारयेल्लव पमेवापहारयेदि सर्थः ॥ कलत्रापहारवत्
स्वलक्ष्म्यापहारो राज्ञां मानहानिकरत्वादनुपेक्षणीय एवे
ति भावः ॥ ३१ ॥ भवंतमिति ॥ हे नरदेव हे नरेंद्र एतर्हि दा
नीमस्मिन्नापत्काल इत्यर्थः । एतर्हि संप्रतीदानीमधुना सां
लि प्रतं तथेत्यमरः ॥ इदमो र्हिलिति र्हिल्प्रत्ययः ॥ एतेतौ रथोरि
॥१८॥ ति एतादेशः । आपदमेवाह ॥ मनस्विगर्हिते अरजनजुगुप् ॥१८॥
स्विते वर्त्मनि मार्गे निवर्तमानं शत्रुहस्तोद्दिष्टामनुभवंतमि रु
त्यर्थः ॥ भवंतमुदीरित उद्दीपितः मन्युः क्रोधः शुष्कं निरसं ।
शुषेः क इति निष्ठायां ककारस्य ककारः । शमीचासौ तरुश्चे
ति विशेषणसमासः । तं शमीतरुं । शमीग्रहणं शीघ्रज्वल

नस्वभावात् । इतं उच्छिखः उद्गतज्वालः । शिखाज्वाले अपि
रू शिखेत्यमरः ॥ वह्निरिव कथं न ज्वलयति ज्वलयितुमुचितमि
त्यर्थः । मितां ह्रस्व इति ह्रस्वः ॥ ३२ ॥ नन्वंतः शत्रुत्वादयं क्रो
धः स्वाज्यपदेशात् व्याह ॥ अवंध्येति ॥ अवंध्यकोपस्यात
एवापदां विहंतुः निग्रहानुग्रहसमर्थस्येत्यर्थः ॥ पुंस इति शेषः ।
हि जंतवो स्वयमेव जनरयाः वशंगताः भवंति । वशंगतेति यप्रत्य
यः । अतस्त्वया कोऽपि नाशवितव्यमित्यर्थः । व्यतिरेकेण निष्टमाचे
ष्टे । यदभावे यदभावो व्यतिरेकः । अमर्षशून्येन जंतुना निःको
पेन प्राणिना । जनस्य । कन्यका शोक इति विध्योना विनिस्तृतीया ।
हृदयस्य कर्म हार्दं सस्नेहः प्रेमा ना प्रियता हार्दं प्रेम स्नेहोथ
दोहदमित्यमरः । युवादित्वादण्प्रत्ययः । हृदयस्य हृल्लेखाण्य
दण्सु । नासेष्विति हृदादेशः । जातहार्देन जातस्नेहेन सताम्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...स तत्त्वाघ एकादशसहस्रसुख्ययुध्यनपस्त्वथन्वीनां॥शास्त्रशस्त्रप्रवीणस्य स ग ९
समहारथ उच्यते॥१॥८

दशेन विद्धि षा स तादशोलुभयंन।अमर्षहिनस्यराग्नदंद्वेषाव किं
चिल्करत्वादगण्या विसर्थः।अथवाद्विषताऽदशेन।दशो स्त्रियां
भयेषुयन्ते इत्यमरः।एतस्मिन्नेव प्रयोगे संधिवशाद्विधानप्र
दच्छेदः।पुंवाक्येषु न दोषः।अतःस्वपने कोपः कार्यः।साध्य साध्यस्त्व
स्थाने कोऽपइतिभावः॥३३॥परिश्रमन्विति॥लोहितचं
दनोचितःउचितलोहितचंदनः आहिताग्न्यादिष्विति साधुः।
अभ्यस्तरक्तचंदन इति यावत्।अभ्यस्तेषुचितंन्याय्यमितियाद
॥१९॥ नः।मोहोरथोरथचारी उभयत्रापि प्राप्ति शेषः।अथवक्रेप्रकृति ॥१९॥
तोधूर्त्तोहिविकृतः।पद्भ्याम तती ति पदातिः।पादचारी सर्थः।अभ्य
तिभ्यां वेसनुवत्सापादेचेत्यौणादिकइण्प्रत्ययः।पदाज्ञोति गोपक
तेष्विति पदादेशः।गिरीणं तरं तगिरि विभक्त्यर्थेऽव्ययीभावः।गिर
श्चसेनकस्येति विकल्पात् समासांताभावः॥परिश्रमन्नपंच

कोदरः।भीमः सस धनसेति स्वालुंठन मपापि सत्यमेव रक्षस्वेन भा
तरइतिभावः।तवेति शेषः।मानसंनोदुनोति किंचित्तन परितापय
ति किं।कच्चित् काम प्रवेदनमित्यमरः।स्वाभिप्रायाविष्करणं काम
प्रवेदनं॥३४॥विजित्येति॥नासवः इंद्रः उपमा यस्य मानं यस्य
समासनोपमः।इंद्रतुल्योयोधनंजयःउत्तरान्कुरून्मेरोरुत्त
अमानुषाने रान्देशविशेषान्विजित्य प्राज्यं प्रभूतं।प्रभूतं प्रचुरं प्राज्यमदभ्रं
बहुलंबहु इत्यमरः।कुप्यादन्यद्कुप्यं हेमरूप्यात्मकं।स्यात्कोशश्च
हिरण्यंच हेमरूप्ये कृताकृते।ताभ्यां यदन्यं तत्कुप्यमित्यमरः।व
सुधनमपचत्दत्तवान्।व्ययप्रेक्षादिनादाणोयथादेशः।सधनं
जयतीतिधनंजयः अर्जुनः संज्ञायां भृतवृजीत्यादिनाखच्प्रत्ययः।
अरुद्विषदित्यादिनामुमागमः।अधुनास्मिन्काले।अधुनेति नि
पातनात्साधुः॥तवबल्कवासां स्याहरन्कथंतव मन्युं कोपं दुः

रूपंतव्यमाहतं ...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कौरानटीघं

कठिनीकृतदेहो३

खवा नकरोति ॥३५॥ वनांतेति ॥ वनस्यांतःस्वरूपं। अंतःप्रांतोतिके
नानोस्वरूपेचमनोहरइति विश्वः ॥ वनांतोवनभूमिरेव शय्यातु
याकुठिनीस्तेआस्तीदेहोयेषांतौ आकारोदेहआस्त तिरितिवेजयंती।
विश्वैकूसमंतात्। समंततस्तुपरितःसर्वतोविश्वैगिसपीसमरः।
कचाचितौकचव्याप्तौविशीर्णकेशाविसर्थः। अतएवागजौगिरिसं
संभवौगजाविवस्थितोइतिशेषः। एतौयमौयुग्मजातौमाद्रीपु
त्राविसर्थः॥ नकुलसहदेवौ॥ यमोदंडधरेध्वांक्षेसंयमेयमजे
पिचेतिविश्वः॥ विलोकपस्त्वंकथंध्वतिसंयमोसंतोषनियमौ।
ध्वतिर्योगांतरेधैर्येधारणाध्वरतुष्टिष्विति विश्वः। व्याघितुंनोत्स
सेनप्रवर्त्तसे। शाकध्वरीसादिनालमन्नाअर्हौतेमहद्वैर्यमिति । ॥२०॥
भावः॥३६॥ अथराज्ञोदुर्दशांदर्शयित्वाउपोद्घातमाह। इत्सर्थी हो
वर्णयितुंअर्थीतरवर्णनमुपोद्घातः। इमामिति॥ इमांवर्तमानांत प्र
दमांतावकीनांदशां। तस्येदमित्यण्। तवकममका वेरव

॥२०॥

धियं

चनइतितावकादेशः। इमौवदापदविषयांचित्तवृत्तिमहंनवेद।
कीदृशींवालवेष्टिपरकुद्रेरप्रसङ्गत्वादितिभावः। विदोलटो
वेतिणलादेशः। नचात्मदृष्टांतेनोपपन्नदुःखितंत्वमनुमा
तुंशक्यते। धीरादिश्वैनेकांतिकत्वादिसाशयेनाह॥ धीरा धी
चित्तवृत्तयः विचित्ररूपाः धीराद्यनेकप्रकाराः खलु। किंतु
परस्मैकूटांभवदापदं विचिंतयंसौमनचेतश्चित्तंआध्यपोमनो भावयंस्मृताः
व्यथाः। उपसर्गोघोरिकिप्रसर्मः। प्रसभंप्रसह्यरुजंतिभंजति।
रुजध्यातोलिट्। परस्यतामपिदुःसहदुःखजैनीलद्विपत्ति न
रनुभवितारंमांकथंनविकारंकरोतिमहच्चित्रमिसर्थः। चे
तइतिरुजाभीजांभाववचनामज्वरेइतिषष्ठीनभवति। तत्रा
शेषाधिकारात्। शेषत्वस्यवैवक्षितत्वादिति॥३७॥ तदाप
दमेवश्लोकत्रयेणाह॥ पुरेति॥ यस्त्वंमाहाधनंवहुमूल्यं
अेष्टमिसर्थः॥ बहुमूल्यंमाहाधनमिसमरः। शायनंश

(२१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीराटी पत्र ॥

ष्यांअधिरूढ:सन्न स्नूतयोगीतपश्चुतापूर्वमंगल्यक्लिते:क्रू
रणाभृते: पुराविबोध्यसेवैतालिकैरितिशेष:।पूर्वंविबो
धितमित्यर्थ:।पुरिलुंङ्।स्मतिभुतार्थेलङ्।सत्वमदभ्रदर्भा
कुशाख्यांप्तां।अस्त्रीकुशोंकुथोदर्भ:।अदभ्रंबहुळंबहु इत्य
मर:।स्थलीमदस्त्रिमृत्स्नांजानपदेस्यादिनाद्दस्त्रिमार्थेङी
प्।एतेनदु:सहस्पर्शत्वमुक्तं।अधिशीङ्स्थासांकर्मेतिक
॥२९॥ कोङ्कुवासि नै:॥५ र्मत्वं।क्षोधुशय्यशायिता।अमंदुकितीषुडाढेशा:अ ॥२९॥
शिवैरमंगलै:शिवारुतै:शिवाहरीतकीक्रोष्टीशामीन
धामलक्यपीतिवैजयंति।निद्रांजहासिअद्येतिशेष:॥
३८॥अनारतमिति।अनारतमजस्रंमणिपीठशायिनौयौच
चरणौराजशिर:स्रजांनमद्भूपालमौलिस्रजांरज:पुरागोरंजय
तौतेचरणौमृगैर्द्विजैरशतपस्विभि:आलूनशिखेपुष्पि

जन्मना जायते शूद्र: संस्कारैर्द्विज उच्यते इति

नायेषुबर्हिषांकुशानां।बर्हि:कुशहुताशयोरितिविश्व:।वने
पुनिषीदतस्तिष्ठत:॥३७॥पुरेति।हेनृपयत्द्विजातिशेषेण एतत्पुरोव
द्विजभुक्तावशिष्टेन।दंतविप्रांडजाद्विजाइत्यमर:।अंधसाअन्नेन।तिष्ठपु:
निसास्त्रीचक्रमंधोन्नमित्यमर:।रमणीयस्यभावोरामणीयकं
मनोहरत्वंउपनीतंप्रापितं।नयतेर्द्विकर्मकत्वात्प्रधानेकर्मणि
क्त:।प्रधानकर्मण्याकर्मवेलादिबहुद्विकर्मणामितिवचनात्।अ
यमन्यफलाशिनस्तवतदेतद्वपुर्यशसासमंपरमतिमा त्वंका
र्यंपरेतिप्राप्नोति।उभयमपिद्विषयतइत्यर्थ:।अत्रसहोक्तिरलंका
र:।तदुक्तंकाव्यप्रकाशे।सहोक्ति:सहार्थस्यबलादेकार्थवाचकमि
ति॥४०॥नकेवलंसर्वप्राणिसाधारण्याभापदिकापरिवेदनेत्याह॥
द्विषन्निति।यद्यस्मात्कारणादियंदशाऽवस्था।दशा वर्त्मानवस्था
यामितिविश्व:।द्विषंतोनिमित्तंयस्या:सा।द्विषन्निमित्ता।द्विषोमित्रेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शत्रु प्रसय:॥ततो नेमनो रसमूलं सातिशयं उन्मूलयती वोत्पाटयतीव॥
दैवि की द्यापन्नदु:खापतेइत्याह॥परैरिति॥परै: शत्रुभि: अपर्यासि
ताऽपर्यावर्त्तिता। वीर्यसंपदो एषां मानिनां पराभवोपि विपदुत्सवभव
ति। वैधर्म्येणांतरंन्यास:॥मानहानेर्दुसहत्वादिति भाव:॥४१॥विहा
येति॥हेन्टपशांतिं विहाय तत्र सिद्ध्या मतेजो विद्धि पों विधाय छन:
संधेहि॥अंगीकुर्वीत्यर्थ:॥प्रसीद प्रार्थनायां लोट्। शमेन कार्यसि
द्धौ सत्यां किं क्रोधेनेत्यत्राह॥व्रजंतीति॥नि:स्पृहा: मुनय: शत्रुनव ॥२२॥
॥२२॥ धूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजंति। नृपास्ततस्तु नकेव
लं कार्यं न तु राजकार्यं न शांतिसाध्यमित्यर्थ:॥४२॥पुर:सरा
मिति॥॥किंच यथा भवतां तेजस्विनां परर्द्धिकारासहिष्णुनामित्यर्थ:।
पुर:सरंतीति पुर:सरा: अग्रेसरा: पुरोग्रतो प्रेषुसर्तेरितिडप्र
त्यय:॥पयोधना: जवाहरा: दु:सहमिति। सुदु:सहमीदृशमनु

.नि३

त्यप्रकारं निकारं प्राप्य रतिं संतोषं अधिकुर्वते [crossed out] स्वीकुर्वतेचे
त्तर्हि तदिति खेदे। मनस्विता अभिमानिता निराश्रया सती हताते
जस्विजनैकशरणत्वान्न स्विता या इत्यर्थ:॥अतो पराक्रमितव्य
मिति भाव:। यद्यत्र प्रसहन संगतेरिति पूर्वी कुरोते: प्रसन
मिसाभने पदं॥भवति प्रहसनं परिभूवइति काशिकायां। तथा
पस्या:॥कर्टनि प्राये। रयमितइत्सानैव आत्मने पदंसिद्धं॥
४३॥अथेति॥अथेति पक्षांतरे निरस्तविक्रम: सन्न्चिरायचि
रकालेनापि क्षमां क्षांतिमेव। क्षांतिरस्तितिक्षाक्षमेत्यमर:॥
सुखस्य साधनं पर्येषि भवगच्छसि चेत्तर्हि लक्ष्मीपतिलक्ष्म
राजचिन्हं कार्मुकं विहाय धरतीति धर: पचाद्यच्। जटानां धर:
जटाधर: सन् इह वने पावकं जुहुधि पावके होमं कुर्वीत्यर्थ:॥
अधिकमर्करणे कर्मत्वोपचार:॥विरक्तस्य किं धनुषेत्यर्थ:॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरात•घंटी•

त्रयोदश संवत्सरान्‌ वनेव सामी सेवं रूपासं वित्‌॥८

चेत्‌१

द्वता माहेधि:॥४४॥अथ समयोल्लंघनाद्विजेषितं दपि न किं
चिदसाह॥निष्ठति परेषु शत्रु पुनिहट ति: परं प्रधानं ये
षु तथोक्ते षपकारत परेषु सत्सु रूरिधा म्नोम हौ त सो प्र
तीकारक्षमस्सेत्यर्थः॥ तेतत्र समयः शपथाचार:॥सम
या: शपथा चार काल सिद्धांत संविद इत्यमर:॥ तस्य प
प्रतिक्षणं रिरक्षणं न क्षमं न युक्तं। युक्ते वे सां प्रतं स्थानं क्षमं शक्ते
षि ते त्रिष्विसमर:। ~~तस्मान्निरक्षणं~~ दिय स्माद्विजयार्थिनः वि
॥२३॥ जिगीषव: क्षितीशा: अरिषु विषये सोपाधिकं सकप ॥२३॥
टं यथातथा॥कपटो स्त्री व्याज दंभो पधयः छद्म कै
तवे इत्यमर:॥ संधिं दूषणानि विवादं विदधति॥केनचि
द्व्याजेन दोषमापद्य संधिं दूषयंति विघटयंतीत्यर्थः॥

पु

चाक्तस्य विजिगीषो: सर्वथा कार्यसाधनं प्रधानं अन्य
स्याप्य रक्षणादिकमशक्तस्येत्यर्थ:। ~~इत्यत्र विजिगी~~ तिभाव:२
अर्थांतरन्यासोलंकार:। पुष्पिताग्रावृत्तं॥न्या॥उक्तम
र्थमाचीवीदहरनेकं उपसंहरति॥ विधिरिति॥ विधि
र्दैवं॥विधिर्विधाने दैवेचेत्यमर:॥ समयः काव्यस्यो:
नियोगाद्रेतो: तयो: दूरतिक्रमत्वादिति भाव:। अगाधे दु
स्तरे। आपत्पयोधि रेतरूपमितत्समास:। दिनहृतमे
जेति वक्ष्यमाणान्वयसारात्‌ तस्मिन्न्नू आपत्पयोधौ मग्नं स्तूयौ
पि सायं सागरे मज्जति अपरे घुरून्मज्जती त्यागम:। दीप्ति: प्र
ताप: आतपश्च तस्या: संहारेण जिह्मम प्रसन्नं शिथिलव
स्तु शिथिलधनं अन्यत्र सिथिलरश्मिं। वस्तु वृकं देवौ रश्मौ
च वस्तुतो येद्यने मणाविति वैजयंती॥शिथिलबलमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म

पाठे ऽस्य त्राऽपि शिथिलशक्तिक्रमिस्पर्धी:। रिपुतिमिरभिन
रिपुतिमिरमुदस्यन्निरस्यो दीयमानं ऽद्यतं। इणगता विति
धातो दैं नादि कार्त्रे र्त्रिरिशान्-च। दिनादौ दिनकरमि
व लक्ष्मीर्त्वयः स्पष्टेलभजल आश्लिलिष्टलोटा वितिलो
ट् ॥४६॥ चमत्कारतया मंगलाचरणरूपतया सर्गांत्य
श्लोकेषु लक्ष्मीशब्दप्रयोगः। यथाह भगवान्भाष्यका
रो मंगलादीनि मंगलमध्यानि मंगलांतानि कान्यानि शा
॥२८॥ स्त्राणि च प्रथयंते वीरपुरुषाण्यायुष्मत्पुरुषकाणि च ॥२८॥
भवंति॥ अध्येतारश्च वक्तारो भवंतिइति इति प्रौढप
मेयं मालिनीवृत्तं॥ सर्गांतावृत्तभेदैः। यथाह दंडी। सर्गैरन
तिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः। सर्वत्र भिन्नसर्गांतैरुप
तं लोकरंजकमिति॥ अथ कविः काव्यवर्णनमाख्यानप्रवेकं

सर्गपरिसमाप्तिं सर्गं कथयति इत्यादि शब्दः परिसमाप्तौ भार
विस्त इति कविनामकथनं महाकवि इति महच्छब्देन लक्षण
संपत्तिः। सूचिता किरातार्जुनीय इति काव्यवर्णनयोः कथ
नं प्रथमः सर्गः इति समाप्त इति शेषः। एवमुत्तरापि द्रष्ट
व्यं॥ किरातार्जुनानधिकृत्य कृतोऽयं ग्रंथः किरातार्जुनीयं।
शिशुक्रंदनयमसभद्वंद्वेंद्रजननादिभ्यः छ इति द्वंद्वाच्छ इ
ति छप्रत्ययः। राघवपांडवीयमिव॥ तथाहि॥ अर्जुन एवा
त्र नायकः किरातस्तु तदुत्कर्षप्रतिपत्तये तया वर्णितः। यथा य
ह दंडी॥ वंशवीर्यप्रतापादीन् वर्णयित्वा रिपोरपि॥ तज्जयं
नायकोत्कर्षकथनं च धिनोति नः इति॥ अथायं संग्रहः॥ ने
ता मध्यमपांडवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते भो
तेऽनुवर्ण्यते तथा दिव्यः किरातः पुमान्॥ शृंगारादिरसोऽय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रौपदीवाक्यश्रवणानंतरं

मत्र विजयीवीरः प्रधानं रसः शैलाद्यालिच्च वर्णिता
लिबहुरोदिव्याख्यलाम्तः पूर्णं ॥१॥ छ छ छ ॥ इति श्री
महोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां प्रथ
मः सर्गः समाप्तः ॥ ५ ॥ विहितामिति। अथ वृकोदरः भी
मः प्रियया द्रौपद्या ॥ प्रियया ग्रहणमस्य हितोपदेशसूच
॥२५॥ नार्थं। विहितामभिहितार्थामित्यर्थः ॥ निरर्थ पूदस्यदधा ॥२५॥
तेः। क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात्॥
मनःप्रियां अभिहितार्थयोगान्मनोहरां विशेषणद्वये
नापि गिरो ग्राह्यत्वमुक्तं। गिरं गरीयसीं सारवत्तरां नि
श्चित्य न्तर्पं धर्मराजमुपपत्तिमत् युक्तियुक्तं दुर्जु
ज्ञातेस्यर्थः श्रे उक्ता

उक्तवान्
वचनं

ता अर्थयं ऽपरार्थमूचे ॥ कर्तरि लिट् ॥ ब्रुवो वचिरिति व
चिरादेशः ॥ ब्रुशासीत्यादिना द्विकर्मकत्वं। अकथितं चेति न्
पस्य कर्मत्वं चेति। वैतालीयवृत्तं ॥१॥ किं तद्वचनं तदेवाह॥
यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमवे
न स्नेहप्रचुरेण। तत्प्रकृतिवचने मयट्। चक्षुषा ज्ञानच
क्षुषा। एतेनाप्तत्वमुक्तं। परितोऽवेक्ष्य सर्वतो विविच्य यद्व
चनमावोचत्। ब्रुवो वचेर्लुङ्। वचउमित्युमागमः। वा
गधिपस्य बृहस्पतेरपि दुर्वचं शेषे षष्ठीयं ॥ नछथथौ घो
अतो ३ गलक्षणं नलोके सादिना षष्ठीप्रतिषेधो नास्ति। तद्व
चनं विस्मयं विदधीत कुर्वीत सर्वस्यापि ति शेषः। अथ
वा वागधिपस्यापि विदधीतेति संबंधः। दुर्वचं केनापीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रातटाघ

कृतोपाध्यायंदुपाप:५
नीति

शेषः। यत्नू स्तैण मपि न चौ शास्त्रमणुरूण द्विहितं चानुब
ध्नाति अतो विस्मयकरं ग्राह्यं चैतद्वचनमिति तात्पर्यार्थः
॥२॥ विस्मयकरत्वे हेतुमाह॥ विषम इति विषमोपि दुर्बोधो
पि अन्यत्र दुःप्रवेशोपि न यो नीति शास्त्रं पयसामाशयो ह्रदइ
व हृततीर्थः हृतान्यासाधुपायः सन्॥ तीर्थं शास्त्राध्वरश्चे
त्रोपायोपाध्यायमंत्रिर्षि ति विश्वः॥ अन्यत्र हृतजलावता
रः सन् तीर्थयो नौजलावतारे चेति हलायुधः॥ विगाह्यते ॥२५॥
॥२॥ विगाह्यते प्रविश्यते च। किंतु तत्र न ये जलाशये सः ताद्दृश पुरुषः
स्तुपुरुषविशेषो दुर्लभः॥ अयं तदुर्लभः॥ यः हृतं संधि
विग्रहादिकं कार्यं अन्यत्र स्नानादिकं तस्य वर्त्म सत् दे
शकालाद्यविरुद्धं अन्यत्र गर्त्तग्राहपाषाणादिरहितं य

उपोद्घात उदाहार१

था तथा उपन्यस्यति उदाहरति। उपन्यासस्तु वाङ्मुखमित्य
मरः॥ यथा केनचिद्धृततीर्थे पयसि गंभीरेपि प्रविष्टारः सं बहवः
ति तीर्थकारस्तु विरलस्तद्वन्नीतावपि गूढं तत्वं वक्तारः स
बहवः ति बोद्धारश्च संति वक्ता तु न सुलभः इयं चातुष्ठितापि ना
लासाधु वक्तीति युज्यते विस्मयकरत्वमिति सर्थः॥३॥ अथ
ग्राह्यत्वे हेतुमाह॥ परिणाम इति॥ परिणामः फलकालः
परिपाकावस्था च तत्र सुखहिते। शास्त्रं चाथ त्रिषु द्रव्ये पापं
पुण्यं सुखादि चेति सुखशब्दस्य विशेष्यलिंगता। शरीरसिंजै गुर्वर्थप्रति
र्यैरुयिष्टे श्रेष्ठे च क्षतौ जसा मृशयत्रापि क्षीणशक्तिकानां व्यथ पादके५
क के युद्धोपो ष्णा तैलाद्युपंकरे॥ अन्यत्र संतापादिदुःखजनके अल्मी
यसि अल्पाक्षरे अल्पमात्रके च। तदुक्तं। स्वल्पमात्रा विपुलो गुण
श्चेति। अस्मिन्वचसि अतीवार्थवति अत्यंत सामर्थ्यवति जे

दुष्क   दोषदीपकस्य१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दु०

षजे औषधेन भेषजौषधभैषज्यानीत्यमरः॥ बहुरनेक
गुणः मानत्राणराज्यलाभादिः (अनेकगुण) रोगघ्नपोषादिश्च इत्य
तेऽतो ग्राह्यमस्याः वचनमिति भावः॥४॥ सत्यमेवं तथापि
पि महत्वं न रोचतेऽहं किं करोमीत्यत्राह॥ दुर्यमिति॥ रुचिरा
धीमहिता संपन्नेति रुचिरोक्तिः इयं भारती द्रौपदीवाक्यं
इष्टगुणाय अभिमतगुणाय गुणग्राहिणे इत्यर्थः। भवते ॥२१॥
दुर्लभमपि रुचिरार्थीनां। प्रियमाणइति संप्रदानत्वाच्चतुर्थी
॥२१॥ ॥रोचतां प्रियतां। प्रियाणां विधत्येत् लोट्। हितवचने बाल्या
दपीद्धां कुर्यादौषधवदिति भावः॥ अथ वास्त्रेणेव च सिका नथापि
श्रद्धेति आह॥ नन्विति॥ गुणानां गृह्याः गुणगृह्याः गुणप
क्षपातिन इत्यर्थः। पदाखैरिह्यापेक्षे पुंवयर्द्द विपश्चितः वि
द्वांसवचने विषये वस्तुविशेषविषये स्त्रीपुंसादिलक्षणेनिः
विद्वान्विपश्चिद्दोषज्ञः इत्यमरः।२

स्पृहाः निरास्था। ननु। खलु। आबालादपि सुभाषितं ग्राह्यमिति
भावः॥५॥ संप्रति स्वपमेवोपालभते॥ यतश्च पि विद्यासु
आन्वीक्षिक्यादिषु॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्च शा
श्वती॥ विद्याश्चैताश्चतस्रश्च लोकसंस्थितिहेतव इति॥ का
मंदकः। निरूढिमागता प्रसिद्धिमागता अत एव विवेकिनी
सदसद्विवेकवती यथाह मनुः॥ आन्वीक्षिक्यां तु विज्ञानं
धर्माधर्मौ त्रयीस्थितौ॥ अर्थानर्थौ तु वार्तायां दंडनीत्यां नया
पानयौ॥ इति। ते तव मतिः करिणी पंकमिव विपर्ययं वैप
रूपत्वं रीत्यं अविवेकिलवं रूपं प्रयाव। सीदति नश्यति। नेदं युक्त
मिति भावः॥६॥ किं नन्नमिदानीं येन एहं उपालभ्यसे
इत्यत्राह॥ विधुरमिति॥ व्यापरैः शत्रुभिः इमामीदृशीमव
गीतां गर्हितां। अवगीतं च निंवादे मुहुर्दृष्टे च गर्हिते इति विश्वः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीरातटीका

घटापचस २

अवेक्ष्य

दशां गमिते सति प्रापिते सति सुरैरपि संभावितवृत्तिबहुश्रुतसं
प्रसारं अथ नाभिनिश्चितसद्भावं पौरुषं पुरुषाकारः पुवादित्वा
दण्प्रत्ययः ॥ अवसीदति पनश्यति यत् अतः [redacted] परं
किं विधुरं किं कष्टं न किंचिदित्यर्थः ॥ विधुरं प्रत्यवाये स्यात्कष्टविश्ले
षयोरपीति वैजयंती ॥ अस्तीति शेषः । अस्तिभवति परः प्रथमपुरुष
प्रयुज्यमानो प्यस्तीति लटः रूपी चीयां संज्ञा ॥ पौरुषीधिकस्य
दुर्दशां सा च शत्रुकृतेति महत्कष्टं तच्चेत् दुपेक्षयेत्पालभामित्यर्थः ॥२८॥
॥७॥ अथोपेक्षा कालत्वादियमुपेक्षा इत्याशंक्य नायमुपेक्षाका
॥ २८ ॥ द्वि लइति वक्तुं श्लोकद्वयेनैव विनक्ति ॥ द्विषतामिति ॥ ऋतिमुदयमिच्छ
ता सुमेधसा शोभना मेधा यस्य तेन सुधिया । नित्यमसिच् प्रजामे
धयोरित्यसिच् प्रत्ययः ॥ गुरूमीहानपि अस्वंततरः असंतदुरंतते
धः क्षयो सुखइत्यर्थः ॥ द्विषतामुदयः सुखेन मृष्यते इति सुमर्षणः
सुसहः उपेक्ष्य इत्यर्थः ॥ स्वंतश्चेद्दुर्मर्षण इति भाव ॥ भाषायां शासि

तद्देवतावत्

अतो गुरु नोत्तु

स्वअभिमतार्थं स्वीकृत्य

युधिसादिखलर्थे युच्चप्रत्ययः ॥ महतानपि फल्गुं संपन्नवर्णो फल्गुसं — अनुकूलः
पदु रभ्युखइत्यर्थः ॥ प्रतिरंतः शरीरेत्यादिनी पात्वं । परिक्षयो न
सुमर्षणः नोपेक्ष्य इत्यर्थः ॥ अन्यथा तूपेक्ष्य इतिभाव ॥ न सुद
य एव प्रतिकार्यो न च क्षयएवोपेक्ष्यः किंतु स्वंतत्वा स्वंतत्वाभ्यां
उभावपि प्रतिकार्यौ उपेक्ष्यौ च भवत इत्यर्थः ॥८॥ अथोभयोर
काद् पि युगपत्परिक्षयागमेनोत्ति [illegible] ह ॥ अचिरेणेति ॥ इतमनिने — रिस्वाद्
ति कृतीकुशलइत्यर्थः ॥ इष्टादिभ्यश्चेति इनिः प्रत्ययः परस्य राज्ञः
क्षययुक्तिं क्षययोगं अचिरेणाशुभाविनी भूयसीं दुरंतां च आत्म
नः क्षययुक्तिं विपरीतां चिरभाविनीं अल्पीयसीं च विगणय्य
विचार्य अल्पलघुरवीदित्यादरः ॥ उपेक्षतें अन्यथाउक्त
वैपरीत्ये परस्य क्षययुक्तौ अल्पीयस्या स्वस्य भूयस्या च क्षय
मित्यर्थः ॥ तत्प्रतीकारं तस्याः क्षययुक्तेः प्रतीकारं अचिरे
णाशु कुरुते एवं च सति यदा राज्ञो रभ्युदयः स्वस्य चातिप
रिक्षयो यथास्माकं तदा किं कर्तव्यं सद्यः प्रतिकारं कुरुते

चिरभाविन्यां स्वतायामित्यर्थः ॥४

स्वतां उपेक्षांकुर्वीत

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यर्थो सिद्धमित्यनुसंधेयं ॥७॥ तथाप्युपेक्षायामनिष्ट
माचष्टे ॥ अनुपालयतामिति ॥ उदयेतिं वर्द्धिष्यमाणां आर्द्धी
नर्थोन्मिति विकल्पानुमभावः ॥ ववद्विषतां प्रभुशक्तिं कोश
दंडजं तेजः स प्रतापः प्रभावश्च यत्तेजः कोशदंडजमित्यमरः ॥ अ
नीहया अनुत्साहेन अनुपालयतां उपेक्षमाणानां महीभुजां श्री
यः संपदो जननिर्वादभयात् निकृष्टपुरुषानुरागो हृल्लोका
पवादभयादिवेति हेतूत्प्रेक्षा अचिरादपयांति अपसरंति य
॥२०॥ थाह कामंदकः ॥ श्रीभिः षंढ इव श्रीभिरालसः परिभूयते इ ॥२०॥
ति अतः पराक्रमितव्यमित्यर्थः ॥१०॥ ननु परिक्षीणः कथं
जवलमति युज्यत इत्यत्राह ॥ क्षयेति ॥ क्षययुक्तमपि तथा
सहजं क्षीणमपि संतं स्वभावजं शिवं सर्वलोकाह्लादकं धाम क्षात्रं
तेजः प्रकाशं च दधतं समद्धेव अर्थ उद्धितं उद्युक्तं उत्सा
हमानमिति यावत् अन्यत्र तु उद्धितं उदितं अत एवानपायि

खेदेन नमविनाशिनं वर्द्धिष्णुमित्यर्थः ॥ नृपं प्रजाः प्रतिपच्चंद्रं द्विति
याचंद्रमिवेत्यर्थः ॥ प्रतिपच्चंद्रेण द्वितीयो पचयिते प्रतिपदि
तस्याद्दर्शनत्वादिति भावः ॥ प्रणमंत्यनुवर्तंते वशीभूयवर्
तंत इत्यर्थः ॥ चंद्रं तु नमस्कुर्वंति क्षययुक्तस्याप्युत्साहः का
र्यसिद्धेर्निदानमित्यर्थः ॥ क्रियं हि शत्रोरुत्साहीनैर्दुर्बलोपि स
मश्नुत इति कामंदकः ॥११॥ ननु प्रभुशक्तिशून्यस्योत्साहः
कुत्रोपयुज्यत इत्यत्राह ॥ प्रभव इति ॥ कर्मणामारंभोपायः
पुरुषद्रव्यसंपत् देशकालविभागः विनीपातप्रतीकारः का
र्यसिद्धिश्चेति पंचांगानि यथाह कामंदकः ॥ साहायास्साध
नोपाया विभागो देशकालयोः ॥ विनिपातप्रतीकारः सि
द्धिः पंचांगमिष्यते इति पंचानामंगानां विनिर्णयः पंचांग
विनिर्णयः तद्धितार्थेत्यादिना उत्तरपदसमासः ॥ ततः पंचां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किरा॰ ३१०

५०

अर्थ

गविनिर्णयो यस्य सतथोक्तो नयोनिति शास्त्रं इति यावत् को
शौ रा(स्त्री:) को शो स्त्री कुड्मले खड्गे पिधाने थौं घदिव्य
यो रित्यमरः॥ दंडश्चतुरंगसैन्यं॥ दंडो स्त्री शासने राज्ञो हिं
सायां लगुडे घने॥ मन्वाज्ञायां सैन्यभेदे इति वैजयंती॥ तयोः
कोशदंडयोः प्रभुशक्तेरित्यर्थः॥ प्रभवत्यस्मादिति प्रभवः॥
कारणं॥ अमदोरप्॥ सनयो विधेयपदेषु कार्यवस्तुषु॥ पदं
व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ दक्षतां स्थि ॥३०॥
प्रकारितं उत्साहमित्यर्थः॥ लोकः स्पष्यादि प्रयुक्तो जनः नि
॥३०॥ यतिमिव दैवमिव॥ नियतिर्नियमे दैव इति विश्वः॥ अनुस
ध्यते ऽनुसरति॥ रूपे दैवादिकात्कर्तरि लिट्॥ मंत्रस्यापि म
त्वं उत्साहस्तन्मूला याः प्रभुशक्ते र्मूलमिति किमुवक्तव्यं
अतः स एवाश्रयणीयः यतो नक्तं दिवं मंत्रयतोपि प्रभो निरु

२६

त्साहस्य न किंचित्साध्यतीति भावः॥१२॥ ननु सोत्साहस्याप्य
सहायस्य कथमर्थसिद्धिरित्यत आह॥ अभिमानइति॥ अ
भिमानवतो मानधनस्य प्रियमुच्चैः श्रेरुन्नतं पदं स्थानं रा
ज्यादिकं आरुरुक्षतो आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनः
धीरस्यात्मपौरुषं स्वपुरुषाकारएव विनिपातनिवर्तनक्षम
मं अनर्थप्रतिकारसमर्थं आलंबनं सहकारिमतं इष्टं॥ यथा
य कस्यचिदुत्तुंगमारोहतः किंचित्पतनप्रतिबंधकमनुच
रहस्तादिकमालंबनं तद्वदिति ध्वनिः॥ किं पौरुषादन्यैः सहा
यैः शूराणामिति भावः॥१३॥ पौरुषानंगीकारे दोषमाह॥
विपदइति॥ अविक्रमं पौरुषहीनं विपदोभिभवंति॥ आक्रमंति॥
आपदुपेतं विपद्युक्तं आपतिरुत्तरकालोरहयति सजति॥ उत्तर
कालआयतिरित्यमरः॥ निरापतेरासन्नक्षयस्येत्यर्थः॥ लघुतां नि

अगौरवं

३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकृद्भिदेनमाद्रियतइत्यर्थः१

यता आव स्यंभाविनी॥ अगरीयान् लघीयान् न्यपश्री यः पदमा
स्पदं न भवति॥ यद्दान्यपश्री इति पदछेदः॥ तस्माद्दोरु षंस्वीक
र्तव्यमित्यर्थः॥ अत्र पूर्वस्या विक्रमत्वादुत्तरोत्तरविपद्यदिकं
प्रति कारणत्वात्कारणमालाख्योलंकारः॥ तथा सूत्रं पूर्वस्योत्त
र हेतुत्वे कारणमालेति॥१४॥ फलितमाह॥ तदिति॥ तस्मादुपे
क्षायां दोषसंभवादित्यर्थः॥ उन्नते रभ्युदयस्य प्रतिपक्षमं
भूतां तरायैर्व्यवसायवंध्यतां उद्योगशून्यतामवलंब्यालं। अवलं ॥३१॥
॥३१॥ बनेनेनालमित्यर्थः॥ अलं खल्वोः प्रतिषेधयोः प्राचोनीत्का प्र
त्ययांतस्यात्वादेशः॥ तथाहि॥ पराक्रमभाश्रयोकारणं यासां
तास्तथोक्ताः समृद्धयः संपदः विषादेन समं अनुत्साहेन सहन
निवसंति॥ चोरूपसाध्याः संपदो नानुत्साहसाध्याः उभयोः
सहावस्थान निरोधादित्यर्थः॥ वैधर्म्य कार्यकारणस्तापोर्थां

पक्षांतरेणत्वयां२ त्रयोदशवर्षाणितावत्कालत्वरणीं२

तरन्यासः॥१५॥ ननु समयः प्रती[illegible] क्ष्यते किं न गोनेत्य
त्राह॥ अथेति॥ अथावधिः कालः प्रतीक्ष्यते चेत्तु। अव
म्लि धिस्वव धाने स्या। सीमि काले बल्वे पिचे ति विश्वः॥ आ
विष्कृत जिह्मवृत्तिना प्रकटित कपट व्यवहारेण धृतरा
ष्ट्र सुतेन दुर्योधनेन नरेंद्रे संपदः यद्वा नरेंद्रेति पदछेदः। राज्यसंपदः
चिरं चतुर्दश नर्षाण्यास्वाद्य अनुभूय कथं सुत्सृजाः॥ भवेयुः॥
त्यो जीतस्वादेनतेन पश्चादपि सुखेन युद्धक्लेशेन विना न
नत्सृजंते उत्क्षिप्त एवेति अवधि प्रतीक्षणं व्यर्थमेवेति भावः॥
१५॥ अथ देवा स्वयमेव संपदो दास्यतीत्याशंक्य तथापि
अस्माकं २ तत्कथं रात्रेयामहीत्याह॥ द्वितामिति॥ अथवाद्विषतांवि दुर्योधनेन
हितं सुनः प्रसर्पितमित्यर्थः॥ आत्मनः पदं राज्यादिकं ज्यान

दत्तं१ पर त्वया१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

32

अस्मत्

लब्धा न स्पृते यदि। लभे: कर्मणि लिट्। हे जननाथ नाहं तवानुजन्मना माविष्कृत चोरुषे: प्रकटितपुरान्न मे: भुजे: हृतं अच्छं भुजे नं किंचित्साध्यमित्यर्थ:। राज्य दानादान यो र्द्विषामेव स्वातंत्र्याद स्मद्गुजनै फल्याक्ष त्रियस्य विजेतव्यमिति शास्त्राच्च क्षात्रेणेव राज्यं ग्राह्य मिति भाव:॥ हृतमिति प्रतिषेधार्थमव्ययं चादिषु पे ठ्यते॥ हृतमिति निवारण निषेधयोरिति गणव्याख्या॥३२॥ न भुजैरिति। गम्यमानसाधन क्रियापेक्षया करण त्वात्। तृतीया उक्तन्यासेघातेन क्रियमाणेव क्रियानि मित्तं कारणभावस्यानुगम्यमानामिति॥१७॥ ननु सा म्नैव कार्यसिद्धौ सत्सां किं क्षात्रेणेत्यत्राह॥ यथाह मनु:॥ साम्ना दानेन भेदेन समस्तैरथवा पृथक्॥ विजेतुं प्रयते

तारीन्न युद्धेन कदाचनेति किमाग्रहेण सान्त्वं प्राह॥ म देति॥ मृगाधिपो सिंहो मदसिक्तमुखैर्मदवर्षिभिरित्य र्थ:। स्वयं स्वेनैव हतै: करिभिर्वर्त्तयते स्ववृत्तिं कुरु ते नैरेव जीवतीत्यर्थ:। चौरादिकस्लाद्वृत्तेलट्। भौवादिक स्य वणाव कण मि कला सिस्वत्। कर्त्रृकादिषु परस्मै पदनियमादिति तेजसा प्रभावेनौण। तेजोनच्छ्रे प्रभावे च ज्योतिष्यर्चिषि रेतसीति वैजयंती॥ जगद्गणयन्न। लघुकुर्वन्न मा हा नन्यतोन्यस्मानुरुपाद्वृत्तिं समृद्धिं नेच्छ तिस्वलु। न कुंजेजस्विन: परायत्तवृत्तिलं युक्तं। मनुव चनं व्यर्थरविषयं। विशेषण तत्रमाण सामान्य समर्थ नाथीतरन्यासोलंकार:॥१८॥ ननु युद्धांशा द्विकौला नपार मउपायातरेस्तृन तथे सान्त्वं प्राह। अभिमानेधनस्येति॥

(53)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुख्यामुख्ययोर्मध्येमुख्यंफलंअन्वाचयःशि॰१८

अभिमानधनस्य नैरिर्निर्यातनमात्रनिष्ठस्येत्यर्थः॥
अतएव गमन। शीठ्ठैः स्थिरैः ठत्वरै श्चेति क्विबंतो निपातः
॥असुस्तिः प्राणे॥ पुंसि भूम्न्यसवः प्राणा इत्यमरः॥ स्थास्नु
स्थिरं स्थाडिस्था च गस्नुरिति ग्स्नु प्रत्ययः॥ रयशः चिचीष
तः॥ चेतुसंग्रहीतुमिच्छतः चिनोतेः समंतात् शानुप्रत्ययः॥
अचिरमंशावो यस्यासा अचिरांशु र्विद्युत् तस्या विलासः स्फु
श्री१ रणं तद्वच्चंचलाक्षणी काइत्यर्थः॥ लक्ष्मीः संपत् अनुषं
गादागतं आनुषंगिकं मन्वाचयशिष्टं अल्पंफलं अन्यतर ॥३३॥
॥३३॥ स्यानुषंगिकत्वे अन्वाचयः मानत्राणंजयर्षिपवमुख्यंफ
भवतुवाने४ लं अभ्यश्चयस्तु लक्ष्मीःरिति मानिनामिदं मेवंश्चाघ्यमित्य श्रा
र्थः॥ अत्रास्थिरप्राणत्यागेन स्थिरंयशः श्रिराभिधानात् न्यू मानएव४
नेनाधिकविनिमयाख्यः प्रत्यलंकारः॥ तदुक्तं काव्यप्रका
शे॥ परिवृत्तिर्विनिमयो योर्थिनां स्यात्समैरि॥१९॥ नन्वक

दि२

पादादिनानआक्रमति५

न्यस्य मानस्य हेतोः कथंप्राणत्यागः कर्तुंशक्यते यतो जीवन्नरोभ
द्रशतानि पश्येत्सारं क्याह॥ ज्वलितमिति॥ जनोत्तसमानां चयंपुंजं
आस्कंदति पादादीना आक्रमति अदाहकत्वादिति भावः॥ ज्वलितं
ज्वलंतं कर्तरि क्तः मतिबुद्धीत्यादिना सूत्रेण चकाराद्वर्तमानार्थ
त्वं हिरण्यंरेतो तं हिरंण्यरेतसमग्निं नास्कंदति दाहकत्वादिति
भावः अतो हेतोमानिनः अपि कृतिमयात् प्राणरक्षणेन तेजस्या
गें त्रात्रवः परित्ति विष्यंतीति स्यादसुनेव सुखमक्लिष्टं उज्झंति
त्यजंति धाम तेजस्तु नो झंति मानहानिकरात् जीवनात् तेजस्वी
नां मरणमेव वरमित्यर्थः॥ पूर्वत्तरश्लोकव दर्थांतरन्यासः॥२०॥
अथवा किमत्र प्रयोजनचिंतया किं तु तेजस्विनामयं स्वभाव एव
पश्चिगीषुलमित्याह॥ किमिति॥ मृगाधीपः सिंहः किं फलं प्रयो
जनमपेक्ष्य ध्वनतो गर्जतः धरंतीते धराः पचाद्यच्। पयसां
धराः पयोधरान् मेघान् प्रार्थयते॥ अपि यातिया आयामभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५

प्रार्थितं च्याचते साधु संरूद्धेपि … हितेपि चेति विश्वः २

अवंतस्यान्तो हिमालेपो प्रा … हि … रोध

पानेच प्रार्थना कथ्यते रुध्ये हि ति केशवः ।। अथवा अवरूणद्धि इत्यर्थः ।।
प्रथमो अर्थ प्रतौ … सेथें स्या घा आनये पो हि स्यक्ति ख्याना तूमे सा
हीयसो महत्तरस्य सा प्रस्तुतिः खलु पथा प्रस्त सो अन्य समुन्न
तिं पुरस्कृत्य न सह तो महतो परत्वं जनमेव पुरूषार्थ इत्यर्थः ।।
एवं वदलंकारः ।।२१।। निगमयति ।। कुर्विति ।। हे नृपते तत्तस्मा वैमित्तिरोष पाद
त् उक्तरित्या पराक्रमोत्साहो हेतोः यत यत स्तता हेता विसमरः ।
मादोनवधा नताङ्समाः प्रमादजं तमो मोहं निधूर्य निरस्य विक्रमे पौरूषे एव मतिं कु ।।३४।।
।।३४।। रु विक्रममेवांगीकुरु न तु पापांतरमित्यर्थः ।। न च विक्रमनैष्फ
ल्यमित्याह । ध्रुवमिति ।। विद्विषां विपत्तय स्त्वदनुत्साहहताः तवा
नुत्साहेना व्यवसायेन हताः प्रतिबद्धाः अन्यथा प्रागेव विपद्ये
रन्निति भावः ।।२२।। न च नः परात्पुत्रां का कार्यमाह ।। द्विरदा
त दंतं ध्रुवं निश्चितं भवेहि विद्धि ध्रुवं निसे निश्चिते चेति शाश्वतः २

[illegible marginal notes]

निति ।। द्विभिभाविताम् दिक्षु प्रख्याताम् आयत आगच्छतः
आहू स्वर्णीदिण धातो रानुप्रत्ययः चतुरो द्विरदान् दिग्गजा
निव तथा उक्त विशेषणान् चतुरस्तोयनिधीन् निवरणे आ
दीर्घान् यतौ दिवि भाविताम् शातमन्यते जस इंद्रविक्रमान् चतु
रस्तवानुजान् द्विषतां मध्येकः प्रसहेत सोढुं शक्नुयादित्य
र्थः ।। शा कि लिङ्ति नाव्यर्थे लिङ् । अतो निःशंकं प्रवर्तस्वे
ति भावः ।।२३।। आशीर्वादव्याजेन फलितमाह ।। ज्वलत इति ।।
निरंतरं नवचेतसि सततं ज्वलतो वैरिस्य तस्य जातवेदसः क्रोधाग्नेरित्य
र्थः ।। शिवेतरा अशिवानां अमंगलावेधव्य दुःखजननादिति भावः ।।
रिपुनारी नयनांबुसंततिः नेरीवनिताश्रुप्रवाहः शमं विद धातु ।।
वैरिस्तस्य क्रोधस्य वैरिवधमंतरेण शांसरसंभवात् अव
श्यं तद्वधस्त्वया कर्तव्य इत्यर्थः ।। क्रोधस्य विषयस्य निगरणेन न
विषयेणो जातवेदस पवोप निबंधनादति शयोक्तिरलंकारः ।।
शिवायाः रत्नराः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरात.८.० घ०स०२

ति२

तदुक्तं विषयस्यानुपादानात् विषयप्रवृत्तिर्न घ्यते ॥ यत्र सा
तिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीवितं त आपि क्रोधस्य जातवे
दसः नेदेप्यनेदाध्यवसायादुद्देदनं नेदरूपातीत त एवानुनि
व्यापलोक्तिश्च घटते तथा चोपयथा चानुसिक्तेनाधिं शा भिः
म्यति तथा शानुवधेन क्रोधद्वैपम्यं गम्यते ॥२४॥ इतीति ॥ इ
स्फुरत्करी साद शिता विक्रिया निकारो वागारं नौंकोयेन तं कोपप स
रीतमानसं कोपाक्रांतचित्तं इदं विशेषणद्वयं द्विरदेपि योज्यं मरु
तः सुतं ।भीमं महीपतिः युधिष्ठिरो दुष्टं द्विरदमिवोपतेन नीमस्य
॥३५॥ शौर्यमेव नानुद्रिरस्तीति गम्यते ।उपसांत्वयितुं मनु ॥३५॥
रनेतुमुपचक्रमे प्रवृत्तः आपाद्योभ्यां समाभ्यामिसाल्लनेपूर्द ॥
राज्ञोतावदुपकारविशेषापेक्षयाकथंचिदवश्योजनः नैशे शा
नै द्विरदवत् वशीकरणीयो न तु सा अइ तिभावः ॥२५॥ प्रथ
मं तावत् स्फुसादिभिः प्रसादयति ॥ अपवर्जित इति ॥ विप्लवः

सर्थः॥३ शुद्धिः

प्रमाणबाधः अन्यत्र बाध्यमत्कसंक्रमोपवर्जितो यस्य तस्मि
न्नपा।वर्जितेः विप्लवे शुचौ सु शब्दे लोहशुद्धिश्च शुचित्वं मति
तद्बुद्धिं इति॥ अत एव हृदयग्राहिणि मनोहरे मंगल्यस्पदे एक
त्रहितार्थप्रतिपादकत्वादन्यत्र मंगलवस्तु ।आज्ञे यस्य
उर्क्त रचौ रोचनं चंदनं हेमं मृदंगं दर्पणं मणिं ॥ गुरुमग्निं तथा
सूर्यं प्रातः पश्येत्सदा बुधः॥ इति पुराणात् तत्र गिरां विस्तरे
वाक्यप्रपंचे ॥ अयमेवाच शब्द इति घञ् प्रतिषेधात् रुद्दोर
वीसरा ॥ अत एव नैमौ विस्तारो विग्रहो व्यासः स तु शब्दस्य वि
स्तर इत्यमरः मतिस्व ।बुद्धिरादर्शइव दर्पणे मुकुरादर्शावि
त्यमरः॥ विमल्या निर्षदा अच्छि हृदयतीमा नैवेशाद्यादेव मति
नैर्यमनुमीयते तत्सर्वकला तस्य स्यर्थः॥२६॥ अथ युग्मे

36

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना ह ।। स्फुटतेति ।। उपपत्तिरिति ।। चैं पदैः स्तुत्ति इत रा द्वैः
स्फुटताविषीदार्थतानापाहृतानसत्का अर्थगौरवं अर्थ
गृह्य स्वं न स्वीकृतं हेति नं स्वीकृतमेनेत्यर्थः ।। वैषीयप्रस
क्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयं संभावनिषेधनि
षेधौ निवर्तने द्वौ प्रतिषेधाविति वामनः गिरां पदानामवां
तरवाक्यानां च पृथगर्थतान्विनार्थता अपुनरुक्तार्थ ।। ते
ति यावत् रचितारुता तथा क्वचिदपि सामर्थ्यं गिरां अन्योन्य ।।३६।।
।।३६।। तं साकांक्षै नापोहितं न वर्जितं अन्यथा दशादि मौदि शब्दव
दकवाक्यता न स्यात् यथाहुः । अर्थैकत्वादेकं वाक्यं सापेक्षं कां
चेद्विभागे ।। स्यादिति न चार्थगौरवमित्यत्र कथं षष्ठीसमासः
प्रत्ययगुणस्यादिना प्रतिषेधान्नैष दोषः ये शुक्लादयः शब्दाः
गुणे गुणिनि च वर्तन्ते यथा पटस्य शुक्लः शुक्लः पट इति च
न स्पृष्टमिति यावत् ।।५ष ३ पूपा ५

तेषामेवात्र निषेधात् ये पुनः स्वतो गुणमात्रवचनाः ।।
यथा गौरवं प्राधान्यं गांभीर्यं स्पर्श इत्येवमादयस्तेषाम
निषेधात् यथा स्वेच्छगुणैः षष्ठी समस्येत इति वचनात् प
टुलमपि युक्तप्रयोगदर्शनाच्च छलाकाया चौक्तामिसादो
लभ्याप्यकारवचनात् असमासः अतएवाह वामनः अत्रा
पीतिमादिषु गुणवचनसमासो बलीस्यादिति ।।२१।। उपपत्ति
रिति ।। किं च नञ्द्वद्वमाश्रिसमैकेणि कम्क्लोपे पंचमीवक्त
व्या उपपत्तिर्युक्तिरुदाहृता परात्क्रमपक्ष एव श्रेयानिति यु
क्तिरुक्तेत्यर्थः । उचितं चैतन्माहात्मीरस्येति भावः ।। तथा तं अनु
मानेन युक्त्या आगमः शास्त्रं च न क्षतो न हतः किंत्वागमावि
रुद्धमेवोक्तं ।। अन्यथा तद्विरोधादनुमानस्येव प्रामाण्यभं
गप्रसंगादिति भावः ।। इह गिरां क्षात्र युक्तमिदं वचनं अवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धमान ईदृगाशा इहैक्षात्रयुक्ताभिप्रायो यस्य सो नीदृगाशयः॥
अभिप्रायः छंद आशय इत्यमरः।कः प्रसन्नं वक्तुमुपक्रमेत न
कोपीत्यर्थः।इहैव क्तुं उपक्रमितैव नास्ति वक्तात्तु दूरापास्त
तु एवेति भावः।केचिदेतं श्लोकत्रयं निंदापरत्वेन योजयंति
तदसत्। हितोपदेशमात्रतत्परत्वातिव्याख्यानं राज्ञो मत्स
रिणइव मानानीरि श्रातरि सर्वानर्थमूलत्व निंदातात्पर्या।।३७।।
र्थकल्पना॥ नौचित्यादिति।।२८।।यदि साधूक्तं तर्हि तथैव
।।३७।। क्रियतामित्याशंक्याह।।अवितृप्तमिति।।तथापि वयासम्यक्कृनि
सस र्णितेपि मे हृदयं अवितृप्ततया असंतुष्टतया अद्यापि
संशयितुरत्वेनेत्यर्थः।।निर्णयमेगा।।धावति अनुसरति।अवे
क्षत इति यावत्। अद्यापि निर्णयस्यानुदयादिति भावः।।नि

र्णयानुदये हेतुमाह।।अवेति निश्चयेषु संधिविग्रहादिषु कर्त
व्यार्थेषु याः विशेषसंपदः अवांतरभेदाः भूमानः ताः सुखम
क्लेशेनावसायथितुं पुरुषान्प्रत्यनुकूल्येन स्वं स्वं रूपं स्व
यमेव शीघ्रं प्रख्यापयितुं प्रकटीकर्तुमित्यर्थः।एवं ते एवंताहक
मैक्षीणे कर्तुकामनुमन्य करणादि सत्यं स्यायं विषयः।क्षमंत इति क्ष
को:क्षमा: शक्या न भवंति।पचाद्यच्।क्षमं शक्ते हिते त्रिष्वित्यमरः।।वि
धेयमात्र संगमत्वेपि तद्विशेषाणां सौक्ष्म्याद्बोद्धुत्वाचन्नर्जी नत्वा सोढव्य
धा०६ दधापि निर्णयाकांक्षेति तात्पर्यार्थः।अत्र निर्णयधावनं प्रस्तुतर
वाक्यस्य हेतुत्वेनाभिधानाद्वाक्यार्थहेतुकं काव्यलिंगमलं
कारः।तदुक्तं हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति।।२९।।
अस्तु विशेषावधारणमंतरेणैव प्रवृत्तिरित्याशंक्याह।।सह
सेति।।क्रियत इति क्रियाकार्यं सहसा अनिमन्नयेत्यर्थः सहसेसा
पुमान् प्रति शोषः १

कस्मिन्काविमर्शयोरिति गणार्थो व्याख्याने स्वरादिपाठादव्ययं न विदधीत न कुर्वीत कुतः अविवेकः अविमृश्यकारित्वं परमत्यंतं आपदां पदं स्थानं कारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयमुखेनाप्याह । वृणुते इति गुणलुब्धा गुणगृध्नुवइ
पंचरणेहे५ ति स्वयं त्रयेव तद्वृत्तिः संपदः श्रीयः विमृश्यकरोतीति विमृश्यकारी उपपदमतिङ् इति समासः तमेव वृणुते भुंजते वृङ् संभक्ताविति धातुः तस्माद्विमृश्यैव प्रवर्तितव्यमित्यर्थः अत्र सहसा वि ॥३८॥
॥३८॥ धाननिषेधालक्षविमृश्यकारित्वरूपकारणस्य पदरूपव्यतिरेकाकारणकार्येण समर्थनाद्वैधर्म्येणार्थांतरन्यासः द्वितीयार्द्धेन च स एव साधर्म्येणेति द्वैधं ॥३०॥ ननु साहसिकस्यापि फलसिद्धिर्दृश्यत एव तत्किं विवेकेनेत्यत्राह ॥ अभीति ॥ यः पुमान् विधीयतइति विधयः स्वस्वकृत्यनिर्वाहकाः इति विधेयः स्वस्य वस्तुनि बीजानीव स्वीकुर्युपमितसमासः । शार

सन्धोर् नकदाचेतद्व्यभिचरतीत्यर्थः ध

दं लोकद्दवेति वाक्यगतोपि मानुसारात् तानि विधिवीजानि विवेकोवारीव तेन विवेकवारिणा पूर्ववत्समासः अनुपालयन् प्रतीक्ष्यमाणः संरक्षन् । अभिवर्षति सिंचति सः पुमान् फलं साधनं निष्पाद्योर्थः सस्यं च फलहेतुस्ततेसस्ये द्वस्तभयत्रापि अमरः । तद्वल्लिनीक्रियाकर्मलोकोजननलोकस्तभुनेजने द्वस्समरः । शारदमिव सदाधितिष्ठति स दाक्रियाफलं प्राप्तोसेव हिताहितनपेक्ष्यतत्कर्म साहसिकं कदाचिद्व्यभिचरतीत्यर्थः । साहसिकस्य काकता
प लीयन्यायेन फलसिद्धिः विवेकिनस्तु नियतेति भावः । अत्र फलशाब्देन सस्यहेतुस्तयोरर्थयोरत्तेदाध्यवसायात् श्लेषरूपा तिशयोक्तिः तदनुगृहीता चोपमेत्सनुसेधेयं ॥३१॥ नियता विवेकिनः फलसिद्धिरित्युक्तं संप्रतितामेव चतुरूच्यर्थं प्रस्तौति ॥ शुचीति ॥ शुचिसांप्रदायभ्रष्टं तं शास्त्रीकृत्य वपुर्भूषयति अन्यथा

स२ श्रेणं१ भूषणं भवति १
रं

(39)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्वान्न पुरुषो न शोभत इति भावः ॥ तस्य श्रुतस्य प्रशमः क्रोधोप
शांतिरलंक्रिया भूषणं भवति अन्यथा श्रुतानैष्फल्यादिति भावः ॥
पराक्रमः सत्सवनसंरे शौर्यप्रशमस्याभरणं अन्यथा सर्वैः परि
ह्रियतेति भावः ॥ स पराक्रमः नयापादितानीतिसंपादिता विवेकपूर्व
र्विकृति यावत् सा चासौ सिद्धिश्च सैव भूषणं यस्य सुतथोक्तः अ
न्यथा साहसिकस्य सिद्धेः काकतालीयापत्तेन पक्षे पराक्रमवैफल्यविगमस्यकारित्वपक्षे ९
॥३२ प्यर्थ्यस्यादिति भावः । वपुषो भूष्यते यत्र सिद्धेः भूषणेत वनुङ्भयं
मध्यमानां च स्वस्य स्वर्गान्तरयास्तुति गर्म्यन्यते अत्रोत्तरोत्तरस्य ३२ ॥
विशेषणत्वादेकावल्यलंकारः तदुक्तमेकावली यत्र विशेषण
भावं पूर्वं पूर्वं प्रतिक्रमेणैव व्रजति परं परमेषा नंदतिरेकाव
लीकथिताइति ॥३२॥ विमृश्य कुर्यादिति श्लोतं तत्र विमर्शो पायः मद्रो
कइत्युक्ते शास्त्रमेवेत्याह ॥ मतीति ॥ मतिभेदः कार्यविप्रतिपत्तिः

परि

मतिभेदस्तमइवेत्युपमितसमासः दीपइवेत्युपमानुसारा तेनन नति
रोहितेऽत एव गहने दुःखगाहेऽस्मिन्विधौ कार्यानुष्ठाने वि
वेकिनां सुहृतः सदाश्य स्तः अत एवंभ्रुद्रो निश्चितान्यत्रस्तु विहितः
प्रवातादिदोषरहितः शास्त्रागमः ॥ आगमः स्म मान्नायइति विश्वः । स्त्र
दीवपइवार्थदर्शनं कार्यज्ञानं वस्तु प्रतिभासं च कुरुते ॥३३॥ एवं वि
मृश्य कुर्वतो दैवादनर्थागमेऽन कश्चिदपराधइत्याह ॥ स्पृहणीयेति ॥
स्पृहणीयगुणैः लोकश्लाघ्यगुणैः महात्मभिः सज्जनैश्चरिते अनुष्ठि
ते वर्त्मनि आचारे मनोयच्छतां निदधतां सन्मार्गेण व्यवहरतामित्यर्थः ॥
विधिहेतुर्दैवनिमित्तकः । विधिर्विधाने दैवे चेत्यमरः ॥ अत एवागसां
अपराधानां अहेतुः अनिमित्तकः विनिपातो दैविकानर्थोऽपि विनिपातो
विपातेस्याद्दैवादिव्यसनेऽपि चेति विश्वः ॥ समुन्नतेः अभिवृद्धेः समः तुल्यः भवती
नि शेषः दैविकेष्वनर्थेषु पुरुषस्यानुपालभ्यत्वादिति भावः । यथाह कामंदकः ॥
पुंसामितिशेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्तु सम्यगुपाक्रान्तं कार्यमिति विपर्ययं ॥ पुरुषस्त्वनुपालंभ्यो दैवान्तरित
पौरुष इति ॥३४॥ स प्रतियद्विमत्र्यं तदाह ॥ शिवमिति ॥ जिगीषवो वि
जयेच्छवोऽल्पाः विजितक्रोधरयाः संतो गरीयसीं प्रभूतामदूषिताय
तीं अक्षतोत्तरकालां स्वतामिसर्थः फलनिष्पत्तिं फलसिद्धिं विगणय्य
व फलैहं निश्चित्येसर्थः पौरुषं पुरुषाकारं शिवं अनुकूलमौपयिकं
उपायप्रवर्तं विनयादित्वात् स्वार्थे ठक् उपयीत्कृस्वलं च नयंति
प्रापयंति पौरुषमुपायेन नयोपनयंतीत्यर्थः नानिश्चितं फलं कर्मकु न
र्वीतीति भावः। यथाह कामंदकः। निष्फलं कोऽभिजहुलं संदिग्धं फलमेव रा८
॥६०॥ वा। न कर्म कुर्यान्मतिमान्सदानैरानुबंधि चेति ॥ नियति प्राणार्थे ह्विकर्म ४०॥५
कः। अत्र पौरुषस्य कर्तृत्व कर्मत्वेऽपि उपायस्यायथात्मा क्रोधं विनयत
इत्यादिवत्कर्तृत्वे च शरीरे कर्मणीत्यात्मनेपदं न भवति ॥३५॥ यदुक्तं
विजितक्रोधरया इति दौर्बल्यकं निराह ॥ अपनेयमिति। उदेतुं अ
भ्युदेतुमिच्छता राज्ञा पुरुषः प्रथमं रोषमयं रोषादागतं मयद्

पं॥

तिमयट् इति तिमिरं अज्ञानं धिया निवेकबुद्ध्या कारणेनापनेयं नोधं
तथा अंशुमता पि कर्त्रा प्रभया तेजसा कारणेन निशाहृतं तमोऽधां
तं अविभिद्य नोदीयते किंतु विभिद्यैवेसर्थः। सूर्यस्यापि एवं किमु
तान्येषामिसपि शब्दार्थः ॥ गोभाविलद् ॥३६॥ ननु दुर्बलस्यैवम
स्तु समर्थस्य क्रोधादेव कार्यसिद्धिरित्याह ॥ बलवानिति ॥ बलवा
न् अरोऽपि यः कोपात् जन्म यस्य तस्य कोपजन्मनः अवस्थंबहुव्रीहिः।
व्यधिकरणे जन्माद्युत्तरपद इति वामनः। तमसो मोहस्य हृद्योगात्क
र्तरि षष्ठी अपि भवमात्रं तिं न रुणद्धि न निवारयति स त्रपः क्षयस्य
पक्षः क्षयपक्षः स्वपक्षः ऐंदवीः इंदुसंबंधिनीः कलाइव क
ला तु षोडशो भागः इत्यमरः। सकलाः शक्तिसंपदः प्रभुमंत्रोत्साहश
क्तीस्तिस्रोऽपि हंति नाशयति अंधस्याऽउंघानलेमिव क्रोधांधस्य लो
कोत्तरमपि सामर्थ्यं व्यर्थमेवेसर्थः ॥ अत्र कालस्य सर्वत्र कार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभ्वा तत्क्षय पक्षस्य कृष्णा क्षयकारिव मलेवत मसस्तत्कांड वि
उंभणान्त थ्या व्यपदेशः ॥३७॥ विमर्शयकुर्वतः क्रियाप्रकारमेवाह ॥
समेति ॥ यः समो नातिमृदुः नातितिग्मा वृत्तिर्यस्य स समवृत्तिः सन्स
मयेसत्सवसरे सर्वं मृदुवृत्तिरुपैति तिग्मतां तीक्ष्णवृत्तिं च तनोति
समेदिनीपतिः विवस्वानिवौजसा निवौजसा तेजसा लोकमधि
पिट तिष्ठति आक्रमति स्वर्चीत् कुत्रे देन प्रातःकालादिभेदेन वा समवृत्तिरिस्या
दियोज्यं ॥३८॥ उक्तान्यथाकरणे अनिष्टमाह ॥ क्वेति ॥ क्रियां संपदां चिरा
॥४१॥ यबहुकालं परिग्रहः स्वापत्तीकरणं कुइंद्रियाणिवाजिन इवेति समासः
दुष्टानां उन्मार्गधाविनां इंद्रियवाजिनां वश्योवशं गतस्तस्य भावस्तत्ता ॥४१॥
घुनोभयमेक संघटत इत्यर्थः कुतः हि यस्मात् शारदभ्रवच्चलाः किं
च बहुछलाः बहुव्याजाः बहुरंध्रा इति यावत् छलं तु स्खलिते व्याजे
इति विश्वः ॥ चलेंद्रिये रजितेंद्रियेरित्यर्थः ॥ असुरक्ष्यां रक्षितुमश
क्याः कथं चित्प्राप्तापि श्रीयोनाविनीते पुतिष्ठंतीत्यर्थः ॥ वाक्यार्थ

सिवःसं१९=नं१

र्यकनिबंधनं अपनोदुः क्षितिं जनयंति उपाश्रयदोषात् दस्ते
न २ र्थं संपदां चंचलत्वं स्वदोषादित्यर्थः ॥ अजितारिषड्वर्गस्य कु
तः संपद इति भावः ॥४१॥ तथापि क्रोधश्चेत्कार्यहानिरित्याश
येनाह ॥ अतिपातितेति ॥ अतिपातिता अपतिक्रांता निका
लः समयानुरूपः साधनानि साहाय्यादीनि यया सा तथोक्ता
तापयंतीति तापिनी कर्तरि ल्युदूटिड्ढात् ङीप् स्वस्वपक्षरि
रं इंद्रियवर्गश्च तयोस्तापिनी अक्षमा क्रोधो धीमवंतं जनवत्
ष्टकुजनमिव तदहमिति नातिप्रसयः तेनैवार्थो लक्ष्यते ॥४२॥
॥४२॥ तद्धितश्चासर्वविभक्तिरिस्यव्ययं न युसिद्धेन यसाध्यास
ला तत् अपनेतुं भंजयितुं दुरिकर्तुं नाहति अत समयक्रोधस्या
मसंतापातिरिक्तं फलं नास्तीत्यर्थः ॥४२॥ दुष्टः क्रोध इत्यु
क्तं अथ क्षमयाः गुणमाह ॥ उपकारकमिति ॥ आयतेरुत्त
ल रकालस्य भद्रामसंतं उपकारकं स्थिरफलहेतुकमित्यर्थः ॥१९॥
रिणः प्रथस्तस्य कर्मफलस्य प्रसूयते अनेजेति प्रसवः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपा.
तार्किका

हेतुकं काव्यलिंगमलंकारः ॥३८॥ क्रोधस्य दुष्टतामुक्त्वा तस्य सा
गमुपदिशति ॥ किमिति ॥ उपात्तरंहसः प्राप्तवरस्य मनसः स
मयोस्य प्राप्ताः सामेक्यमधिकः समयः तदस्य प्राप्तमिति ठकू ख
नभव ।तीति असामयिकः तं अप्राप्तकालं क्रोधं वितन्वता भव
तोधिरतया धैर्यगुणेन मनसो निर्विकारत्वं धैर्यं स्वपि हे
तुष्विति रसिकाः अपरिहृतः तिरस्कृतः प्राप्तिति शेषः अपांपति
रपि ॥ किं किमर्थं उच्छ्रकैः अधिकः क्षिपते न पराजितं पुनरुच्चकैः
कुर्यादिति भाव ॥ अत्र वितन्वतेति श्रीमद्विशेषणत्वेन पदार्थ
स्याद्यकरण हेतुत्वात् काव्यमलंकारः ॥४०॥ ननु सहजचप
लाश्रियः श्रूयंते तत्कथं श्रुत न स्यानुपालनसेत्यत्राह ॥ श्रु
तमिति ॥ किंच ये श्रुतं शास्त्रं अधिगम्यापि शरीरजन्मनः शरीरप्र
भवान्करिपून् कामक्रोधादीन् न विनयंते न निग्रहंति कृत्स्नत्याय २
शरीरकर्मणीसात्मने पदं चिरायात्मीय संपदां चापलाश्रयं अस्थैर्य

तेरवलु अ सम्यकृतावापि

KKSU LIBRARY
RAMTEK
441 106
M 1346
Dist Nagpur

६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 13:20
,TRANSFERRED=2020/10/23 at 13:25:57
,PAGES=43
,TYPE=STD
,NAME=S0004474
,Book Name=M-1346-KIRATAJUNIY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection